

दानधर्म

दा०
१

श्रीगणेशायनमः यज्ज्योतिस्तमसः परं महहृदे निर्मोपहृत्पाणितन्मात्मानिद्रविभक्तप्रचक्षवहस्येतैर्गृहायांगतं आनंदैकरसंतरहृयमथो तन्मापयादेवकीकुंतीसमवतीभुज
न्मथ्यतवल्कृष्णत्रयं पातुनः १ गोपालनारायणलक्ष्मणार्यान् श्रीरंगगंगाधरनीलकंठान चिंतामणिं सांबशिवं चनत्वा व्याकुर्महे भारतदानधर्मान २ धर्मत्रिसूद्रविरामहष्ट
काममोक्षाविकत्रपर्वणि निरूपितवान्मुनींद्रः तत्साधनानि सवद्भूनि सहप्रमाणान्यत्रानुशासनिकपर्वणीतानि ३ तत्रपूर्वस्मिन्पर्वणि शोकतरणोपायः ससाङ्गः रूपि
तः तथापि हृष्टद्धः स्वनिदिध्यासनमंतरेणानिवर्तते इति तत्प्रधानं प्रकरणमारभमाणः पूर्वं तावत्कृताकृतसंतापनिमित्तं कर्तृत्वाभिमानं त्याजयितुं प्रथममध्यायमारभते

नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ युधिष्ठिर उवाच शमो बहुविधाकारः
सूक्ष्म उक्तः पितामह नच मे हृदये शांतिरस्ति श्रुत्वेदमीदृशं १ श्रीरामायनमः॥ ॥श्रीरामनामतारकं॥ ॥

तत्रापि युक्तिशतेनापि कर्तृत्वाभिमानस्य दृढस्य प्रतत्त्वं युधिष्ठिरप्रश्नमुखेनावतारयति युधिष्ठिर उवाच शमो बहुविधाकारस्त्यादिना शमः शोकतरणोपायः बहुवि
धः कालादृष्टेश्वराद्यधीनोयं लोको न किंचित्कर्तास्मीत्यादिविवेकप्रकारः बहुकारः सर्वसंकल्पसन्यासादिस्वरूपः सूक्ष्मो निर्विकल्पक उक्तः तथापि तत्सा
क्षात्काराभावान्हतं गोत्रवधाख्यं पापं मां तपत्येव तस्मात्कर्तृत्वादिदोषमपनेतुं निदिध्यासनाधिकारसिध्यर्थं चेतःशुद्धिकरान्धर्मान्ब्रूहि ये विनाप्येवोक्तं सर्वं स्वहृदयेना
वतिष्ठत इत्यभिप्रायः १ श्रीरामायनमः॥ ॥ ॥ ॥ राम०
१

अस्मिन्निति यद्दिष्टमिति तमेव ज्ञायेतेतत्कालादिकृतमिति मत्वा न धीमतां शोकाय भवति यत्तु बुद्धिपूर्वं पापं कृतं तत्कथं माहशानस्त्यास्तिकानशाह्निकविवेकमात्रेण
न तयेत्अपरोक्षसकर्तृत्वादिप्रपञ्चपरोक्षेण कर्तृत्वादिज्ञानेन निवर्त्तयितुमशक्यत्वादिति भावः २ एतदेव शोककारणं विवृणोति शरेति त्वामिति शेषः ३ सीदे

अस्मिन्नर्थे बहुविधा शान्तिरुक्ता पितामह स्वकृते का नु शान्तिः स्याच्छमाद्बहुविधादपि २ शराचितशरीरं हि तीव्रव्रणमुदीक्ष्य च शर्म नोपलभे
वीर दुष्कृतान्येव चिन्तयन् ३ रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाचलं त्वां दृष्ट्वा पुरुषव्याघ्र सीदे वर्षास्विवाम्बुजं ४ अतः कष्टतरं किं नु म
त्कृते यत्पितामह इमामवस्थां गमितः प्रत्यमित्रै रणाजिरे ५ तथा चान्ये नृपतयः सहपुत्राः सबान्धवाः मत्कृते निधनं प्राप्ताः किं नु कष्टत
रं ततः ६ वयं हि धार्त्तराष्ट्राश्च कालमन्युवशंगताः कृत्वेदं निन्दितं कर्म प्राप्स्यामः कां गतिं नृप ७ इदं तु धार्त्तराष्ट्रस्य श्रेयो मन्ये जनाधिप
इमामवस्थां संप्राप्तं यदसौ त्वां न पश्यति ८ सोऽहं तव ह्यन्तकरः सुहृद्वधकरस्तथा न शान्तिमधिगच्छामि पश्यंस्त्वां दुःखितं क्षितौ ९
अतः श्रेयो मृतं मन्ये नेह जीवितमात्मनः अहं हि समरे वीर गमितः शत्रुभिः क्षयं १० अभविष्यं यदि पुरा सह भ्रातृभिरच्युत न त्वामेवं सु
दुःखार्त्तमद्राक्षं सायकार्दितं ११ नूनं हि पापकर्माणो धात्रा सृष्टाः स्म हे नृप ११ अन्यस्मिन्नपि लोके वै यथा मुच्येम किल्बिषात् तथा
प्रशाधि मां राजन्मम चेदिच्छसि प्रियं १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

सीदामि ४ मत्कृते मन्निमित्तं प्रत्यमित्रैः अमित्राणां प्रतिकूलैरस्मदीयैरर्जुनशिखण्डिप्रभृतिभिः ६ वयं हीति हिश्चार्थे कालईश्वरः मन्युः क्रोधः गतिं ऊर्ध्वलोकं प्राप्स्यामो न
कामयीसर्वः ७ अपशोच्यत्वानामस्माकं त्वयमपि लोको नष्टो न तु परो यास्मिस्याह इदं त्विस्यादिना ८ भविष्यं ईश्वरश्चेत्स्यां ११ अन्यस्मिन्निति जन्मान्तरेऽपि येन किल्बिषात् रागा
दितो यान्मुच्येम तादृशं धर्मं ब्रूहि शोकनाशकस्य तत्त्वज्ञानस्यानेकजन्मसाध्यत्वादिति भावः ॥ ॥ ॥ ॥ ॥

दा० यदुक्तं त्वत्कृते कानुशोचतीति तत्राह परेति परतंत्रं कालादृष्टेश्वराधीनमात्मानं त्वं कथं कर्मणां हेतुं पुण्यपापयोः कारणं अनुपश्यसि न कथंचिदात्मनः कर्तृत्वं संभवतीति भावः कुतस्त
२ र्ह्यहं करोमीत्यनुभवस्तत्राशंक्याह सूक्ष्मं हीति आत्मनः कर्तृत्ववदकर्तृत्वेन मानमप्रसक्तं किंत्वतींद्रियं मनस्त्वचक्षुरादिवदुष्टमदन्यथामंतमात्मानमन्यथा प्रतिपद्यत इति भावः
१३ कर्मप्रयोजकं देहेंद्रियादिसंघातः प्रयोज्यः तयोश्च बीजांकुरवदन्योन्य जन्मजनकत्वं परिशेषादात्मनो कर्तृत्वं सिद्धमिति साक्षिणीं आख्यायिकामाह अत्रापीति १४

भीष्म उवाच परतंत्रं कथं हेतुमात्मानमनुपश्यसि कर्म्मणां हि महाभाग सूक्ष्मं ह्येतदतींद्रियं १३ अत्राप्युदाहरंतीममितिहासं पुरातनं संवा
दं मृत्युगौतम्योः काललुब्धकपन्नगैः १४ गौतमी नाम कौंतेय स्थविरा शमसंयुता सर्प्पेणादष्टं स्वं पुत्रमपश्यद्गतचेतनं अथ तं स्नायुपाशेन ब
ध्वा सर्प्पममर्षितः लुब्धकोऽर्जुनको नाम गौतम्याः समुपानयत् १६ स चाब्रवीदयं ते स पुत्रहा पन्नगाधमः ब्रूहि क्षिप्रं महाभागे वध्यतां केन हे
तुना १७ अग्नौ प्रक्षिप्यतामेष छिद्यतां खंडशोऽपि वा न ह्ययं बालहा पापश्चिरं जीवितुमर्हति १८ गौतम्युवाच विसर्जैनमबुद्धिस्त्व
मवध्योऽर्जुनक त्वया को ह्यात्मानं गुरुं कुर्यात्प्राप्तव्यमविचिंतयन् १९ प्लवंते धर्म्मलघवो लोकेंऽभसि यथा प्लवा मज्जंति पापगुरवः श
स्त्रं स्कन्नमिवोदके २० हत्वा वैनं नामृतः स्यादयं मे जीवत्यस्मिन् कोऽत्ययः स्यादयं ते अस्योत्सर्गे प्राणयुक्तस्य जंतोर्मृत्योर्लोकं को नुगच्छेदनंतं

हेतुमेवाह अबुद्धिरिति १८ गुरुपभारेणात्मानं रके मज्जनयोग्यं प्राप्तव्यं लोकं १९ प्लवंते दुःखार्णवं तरंति मज्जंति चलेनैव २० हत्वेति वारणात्वं त्यक्तार्थः मुक्तैव हितं नोऽमृतधीत्येति च
त एनं हतवतस्तव हननेनायं मे पुत्रो नामृतः स्यात्किं तु मृत एव अस्मिन् जीवति तेन तव को पंचत्वपोनाशः स्यात्कोपीसर्थः उत्सर्गे प्राणोत्सर्गे मृत्योर्लोकं नरकं २१ ॥ ॥ दान०
२

सक्तेन्द्रियुक्ताः सर्वेषांपीडयापीडिताः स्वकृतस्यैवनतदुःखितस्य २२ शमेति शमयुक्ताः कालेनैवायंविनाशितइतिमत्वाशोकंत्यजंति अर्थविदः प्रतीकारज्ञाः शत्रुंहत्वैवस्त
द्यः शोकंत्यजंतीत्यर्थः अन्यस्त्वश्रेयः ह्ययंहतुत्स्वनाशंनिसंमोहाच्छोचति २३ आर्त्तिः पुत्रशोकजापीडा नित्यायस्तोनित्यामतः नईशेनसमर्थोस्मि २४ यातनांपीडांपर
स्येतेकुतः कुर्युर्नकुतश्चिदित्यर्थः मार्द्दवात मार्दवमवलंब्य २५ श्रेयः परलोकहितंतदेवअश्रेयोलाभः सचशत्रून्हत्वैवलभ्यइत्यध्याहृत्ययोज्यंपश्यापद्यमानः पशुनिघ्नत्यु

लुब्धकउवाच ज्ञानाम्यहंदेविगुणागुणज्ञेसर्वार्त्तियुक्ताःगुरवोभवंति स्वस्थस्यैतेतूपदेशाभवंतितस्मात्क्षुद्रंसर्पमेनंहनिष्ये २२ शमार्थिनः
कालगतिंवदंतिसद्यः शुचंत्वर्थविदस्त्यजंति श्रेयः क्षयंशोचतिनित्यमोहात्तस्माच्छुचंमुंचहतेभुजंगे २३ गौतम्युवाच आर्त्तिर्नैवं
विधेतेमद्विधानांधर्म्मात्मानः सर्वदासज्जनाहि नित्यायस्तोबालकोप्यस्यतस्मादीशेनाहंपन्नगस्यप्रमाथे २४ नब्राह्मणानांकोपोस्ति
कुतः कोपाच्चयातनां मार्द्दवात्क्षम्यतांसाधोमुच्यतामेषपन्नगः २५ लुब्धकउवाच हत्वालाभः श्रेयएवाव्ययः स्याद्धन्याल्लाभ्यः
स्याद्बलिभ्यः प्रशस्तः कालाद्लाभोयस्त्वसत्योभवेतश्रेयोलाभः कुत्सितेस्मिन्नतेस्यात २६ ॥ ॥ ॥ ॥

मात्मानंचस्वर्गंनयत्येवंयूयंः परंस्वंचेत्यर्थः ततश्चलाभ्योलाभार्हः उभांश्चवलिभ्यः सर्वेभ्यः प्रशस्तः श्रेष्ठश्चस्यात शत्रुवधात्लौकिकहृद्येपिमाभोभवतीत्यर्थः यस्त्वसत्त्वस्तीन्स्यैकुत्सि
तेवह्रूयकारिणिहंतव्यकलाद्लाभोऽस्मरणादिरूपस्तिहि: एवंचमसः शाश्वतः श्रेयोलाभः सचैतेनवस्यंहंतमनिनिर्हिंसाः नस्याततस्माद्हंतव्यएवायमित्यर्थः २६ ॥ ॥

हा० गरुत्वनिगृह्याकामासिः इष्टलाभः नमुक्त्वा दृष्ठं वध्यानोः स्माकमशत्रो भुजंगेकस्मात्वहंनक्षमेत्र्यपितक्षमेपएव मोक्षेणार्थश्रेयः कुर्यामेवेत्सर्थः २७ त्यजंतिनाशयंति २८ मेपत्र
कोजीवितंनसंप्राप्स्यतेशरणांपुराणंजीवं जीवंतं २९ मूलीयज्ञंहत्वेतिसंबंधः ३१ संतम्भ्यधैर्यमालंब्य ३२ अचचुंतप्रेरितवान ३३ किल्विषंचेदस्तितर्हिश्रयोःक्तु
३

गौतम्युवाच कानुप्राप्तिर्गस्यशत्रुंनिहसकाम कामासिः प्राप्यशत्रुंनमुक्त्वा कस्मात्सौम्याहंनक्षमेनोभुजंगेमोक्तार्थवाकस्यहेतोर्नकुर्य्यां २७
लुब्धकउवाच अस्मादेकाद्बहवोरक्षितव्यानैकोबहुभ्योगौतमिरक्षितव्यः कृतागसंधर्म्मविदस्त्यजंतिसरीसृपंपापमिदंजहित्वं २८ गौतम्यु
वाच नास्मिन्हतेपन्नगेपुत्रकोमेसंप्राप्स्यतेलुब्धकजीवितंवैगुणांचान्यंनास्यवधेप्रपश्येतस्मात्सर्प्पलुब्धकमुंचजीवं २९ लुब्धकउवाच वृ
त्रंहत्वादेवराट्श्रेष्ठभाग्वैयज्ञंहत्वाभागमवापचैव मूलीदेवोदेवयज्ञंचरत्वंक्षिप्रंसर्प्पजहिमाभूत्तेविशंका ३० भीष्मउवाच असकृत्सो
च्यमानापिगौतमीभुजगंप्रति लुब्धकेनमहाभागापापेनैवाकरोन्मतिं ३१ ईषदुच्छ्वसमानस्तु कृच्छ्रात्संस्तभ्य पन्नगः उत्ससर्जगिरंमंदांमा
नुषीपाशपीडितः ३२ सर्पउवाच कोन्वर्जुनकदोषोत्रविद्यतेममबालिश अस्वतंत्रंहिमांमृत्युर्विवशंपदचूचुदत ३३ तस्यायंवचनाद्द
ष्टोनकोपेननकाम्यया तस्य तत्किल्विषंलुब्धविद्यतेयदिकिल्विषं ३४ लुब्धकउवाच यद्यन्यवशगेनेदंकृतंतेपन्नगाशुभं कारणांवैत्वमप्यत्रत
स्मात्त्वमपिकिल्विषी ३५ मृत्पात्रस्यक्रियायांहिदंडचक्रादयोयथा कारणात्वेप्रकल्प्यंतेतथात्वमपिपन्नग ३६ ॥ ॥ ॥ ॥

रेवनप्रयोज्यस्यममशरणेवेत्सर्थः ३४ गदीतिप्रयोजकस्यप्रयोज्योपिवधकारणत्वाद्वध्यएवेत्सर्थः ३५ मदितियद्यपिंडादिववर्तत्वंत्र्यन्यवशस्तथापि चेतनत्वात्किल्विषीसव एम०
श्यवध्योसीत्सर्थः ३६ ॥ ॥ ॥ ॥ ॥ ॥ ॥
६
३

३७ सर्व इतिचेतनस्येपि गजादिवत्परवश्यत्वेनावशत्वांदृंगादिकल्पत्वमेवममेत्यर्थः ३८ अथवेति तेपिश्चाप्रधानरूपोपि अयमर्थः आयुर्षहि अपरकांतवस्य हन्तारिप्रयो
जयति तेनायुषकर्त्तापि प्रयोजकत्व स्यायकारपिताप्रहर्त्ता काम प्रयोजकश्चान्योन्यप्रयोज्यत्वान्नकस्यचिद्दुष्टत्वमित्यर्थः ३९ फलीनमाहएवमिति चेतनत्वाद्दुष्य
त्वंममचेन्मन्यसे तर्हि एकस्मिन्वधकार्ये साक्षात्परंपरयावद्बहूनांप्रयोजकत्वमस्तीतिसर्वे सुपद्या विभागंकिल्बिषंनमयोवेत्यर्थः समवायेसमुदाये ४० कर्त्तावक्तनक्रि
यापांत्वमेववध्योसीत्यर्थः ४१ अमतीतिपतः कृतेपिअसमतिदुष्टेकार्येदोषेहेतुः कर्त्तानिलिप्यतेनवमतेतस्मात्चोएदिरत्रेवराजांवध्यापापश्चिन्तीचनस्यात तथा

ते २

किल्बिषीचापिमेवध्यः किल्बिषीचापिपन्नग आत्मानंकारणंह्यत्रत्वमाख्यासिभुजंगम ३७ सर्प्पउवाच सर्वएतेह्यवशादंडु
चक्रादयोयथा तथाहमपितस्मान्मेनैषदोषोमतस्तव ३८ अथवामतमेतत्तेप्यन्योन्यप्रयोजका कार्यकारणसंदेहोभवत्य
न्योन्यचोदनात ३९ एवंसतिनदोषोमेनास्मिवध्योनकिल्बिषी किल्बिषंसमवायेस्यान्मन्येसेयदिकिल्बिषं लुब्धकउवाच का
रणंयदिनस्याद्वैनकर्त्तास्यात्त्वमप्युत विनाशकारणंत्वंचतस्माद्वध्योसिमेमतः ४१ असत्यपिकृतेकार्येनेहपन्नगलिप्यते तस्मान्ना
त्रैवहेतुः स्याद्वध्यः किंवहुभाषसे ४२ सर्प्पउवाच कार्याभावेक्रियानस्यात्सत्यसत्यपिकारणे तस्मात्समेस्मिनहेतोमेवाच्योहेतुर्विशि
षतः ४३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वशात्स्यानर्थकंप्रसस्वादिंतितेचनानिदेशप्रामाण्यंवस्यादितिभक्षः ४२ कार्येति कारणोकर्त्तारिसतिकुठारोघमनादिकार्येणछिदिक्रियाजायते असत्यपिकर्त्तारितस्यशास्त्रांतनि
षेधेणकार्येणतत्तेनाग्निनावनदाहक्रियाजायते तस्माच्छास्त्रायाइवममापिकर्तृत्वेप्रयोजकत्वात्तनदोषहेतुः विरोधाभावादित्यर्थः ४३ ॥ ॥ ॥ ॥

शा० ४

यदीति कारणत्वेनमप्रयोज्यकर्तृत्वेनतवमतोहंनहिंशास्त्रायायावायुरिवममापिप्रयोगेप्रवर्त्तने मोस्तिकर्त्तामिएवजंतुनाशनेत्रकिल्बिषीभवेत्तवस्तुतस्तुवायोरिवतस्यापिनकिल्बिषि
त्वमितिभावः ४४वध्यइतिधीइर्वकारिहिंसास्वभावस्त्वंकुनर्कैर्वृद्धसाधर्म्यमात्मनोब्रुवाणोदुर्बुद्धित्वाद्वध्योसीत्यर्थः ४५ एवमप्यृत्विगादिवदन्यप्रेर्यत्वान्नाहंकिल्बिषीकि
न्तममप्रयोजकएव शास्त्रफलंप्रयोक्तरीतिन्यायादितिसर्पउवाच यथेति ४६ यथास्तेनेंगनोहंतिगजंचमहामात्रः प्रेरयतिमहामात्रंचप्रभुः प्रयुंक्तेप्रभुंवेत्ति

यद्यहंकारणत्वेनमतोलुब्धकतत्वतः अन्यः प्रयोगेस्यादत्रकिल्बिषीजंतुनाशने ४४ लुब्धकउवाच वध्यस्त्वंममदुर्बुद्धेबालघातीन
शंसकृत भाषसेकिंबहुपुनर्वध्यः सन्पन्नगाधम ४५ सर्पउवाच यथाहवींषिजुह्वानामखेवैलुब्धकर्त्विजः नफलंप्राप्नुवंत्यत्रफलयोगे
तथास्म्यहं ४६ भीष्मउवाच तथाब्रुवतितस्मिंस्तुपन्नगेमृत्युचोदिते आजगामततोमृत्युःपन्नगंचाब्रवीदिदं ४७ मृत्युरुवाच प्रचो
दितोहंकालेनपन्नगत्वामचूचुदं विनाशहेतुर्नास्यत्वमहंनप्राणिनःशिशोः ४८ यथावायुर्जलधरान्विकर्षतिततस्ततः तद्वज्जलद
वत्सर्पकालस्याहंवशानुगः ४९ सात्त्विकाराजसाश्चैवतामसायेचकेचन भावाःकालात्मकाः सर्वेप्रवर्त्तन्तेहजंतुषु ५० जंगमाःस्थावरा
श्चैवदिविवायदिवाभुवि सर्वेकालात्मकाः सर्पकालात्मकमिदंजगत ५१ प्रवृत्तयश्चलोकेस्मिंस्तथैवचनिवृत्तयः तासांविकृतयोया
श्चसर्वंकालात्मकंस्मृतं ५२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

न्नापराधइतितेनस्वापराधेनैवक्लिश्यतेननतत्रराजमहामात्रगजानांदोषसंबंधोस्तिएवंभीष्मादाग्निम्नतोपिनवगनस्येवनदोषोस्तीतिशेषंवध्यंप्रनास्यंयमत्युः प्राणानामपहर्त्रीदेवता ४७
कालेनईश्वरेण ४९ कालात्मकाः कालएवआत्मास्वभावोयेषांते कालानुसारिणइत्यर्थः ५२ ५२ ५२ ५२ ५२ ५२ शा० ४

५३ भावाभावौ ऐश्वर्यानैश्वर्ये ६० आर्त्विज्यमिमौ कुरुतो मिरितिन्यायेनात्मनेचपज्ञमानाय वर्यंकामंकामयतेनेत मागायतीतिश्रुते आत्मवद्द्विजोपि फलांशभाक् अतो मृत्युसर्पौ वध
सकारणं मंतोनन्वकारणं भवतस्त्याहमत्युरिति ६२ आवां दोषेणाहेत्यादिनाप्रक्तौ त्वयावमंतव्यौ किंतु विवशौ अतः घ्नतोऽप्यावयोर्गजिमहामीत्रयोरेव न किल्बिषम् अतो साहतः

आदित्यश्चंद्रमाविष्णुरापोवायुः शतक्रतुः अग्निः खं पृथिवीमित्रः पर्जन्योवसवोऽदितिः ५३ सरितः सागराश्चैवभावाभावौचपन्नग सर्वेकालेन
सृज्यंतेह्रियंतेचपुनः पुनः ५४ एवंज्ञात्वाकथंसर्पसदोषंमांत्वमन्यसे अथचैवंगतेदोषेमय्यपित्वमपिदोषवान् ५५ सर्पउवाच निर्दोषंदो
षवंतंवानत्वांमृत्योब्रवीम्यहं त्वयाहंचोदितइतिब्रवीम्येतावदेवतु ५६ यदिकालेनदोषोस्तियदितत्रापिनेष्यते दोषोनैवपरीक्ष्योमेनह्य
त्राधिकृतावयं ५७ निर्मोक्षस्त्वस्यदोषस्यमयाकार्योयथातथा मृत्योरपिनदोषःस्यादितिमेत्रप्रयोजनं ५८ भीष्मउवाच सर्पोथार्जु
नकंप्राहश्रुतंतेमृत्युभाषितं नानागसंमांपाशेनसंतापयितुमर्हसि ५९ लुब्धकउ० मृत्योःश्रुतंमेवचनंतवचैवभुजंगम नैवतावद्दोषत्वंभव
तित्वयिपन्नग ६० मृत्युस्त्वंचैवहेतुर्हिबालस्यविनाशने उभयंकारणंमन्येनकारणमकारणं ६१ धिङ्मृत्युंचदुरात्मानंक्रूरंदुःखकरंसतां त्वां
चैवाहंवधिष्यामिपापंपापस्यकारणं ६२ मृत्युरुवाच विवशौकालवशगावावांनिर्दिष्टकारिणौ नावांदोषेणगंतव्यौयदिसम्यक्प्रपश्यसि
६३ लुब्धकउवाच युवामुभौकालवशौयदिमेमृत्युपन्नगौ हर्षक्रोधौयथास्यातामेतदिच्छामिवेदितुं ६४ ॥ ॥ प२ ॥

विवशाविति कर्त्विजोपि फलभागिन एव फलमलीनविरक्तस्येति भावः ६३ युवामिति। भो मृत्युपन्नगौ यदि युवां कालवशौ तर्हि मे मम परोपकर्त्तरि हर्षः अपकर्त्तौ श्चव
योर्हर्षद्वेषौ वा यथा स्यातां तथा ब्रूतम् एतत् अहं वेदितुमिच्छामीत्यर्थः ह्यलौ हर्षकं योज्यं एवं सर्वस्य परवशत्वे उपकर्त्त्रपकर्त्त्रोः स्तुतिनिंदे न स्यातामिति भावः ॥ ६४ ॥ ॥

टी.२

परमार्थतः परिहारमाहयेति ईश्वराधीनोजनः सुदस्सह्याकुर्वाणोनरस्तेनोनवानिंद्यइतिभावः ६५ व्यवहारतस्तमस्मरः पूर्वोक्तमेवपरिहारमाहतस्मादिति दोषेणायुक्तावितिशेषः
गंतव्योज्ञानव्यौ योहिरागादिमान्हंतिसपापेनलिप्यतेतंप्रतिशास्त्रप्रवर्त्ततेतंप्रतिशास्त्रंप्रवर्त्तते यस्तुनतथानासौदोषभाग्भवेद्यथोक्तंभगवता यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्य
ते हत्वापिसइमान्लोकान्नहंतिनन्निबध्यतेइति ३६ प्राणिकर्मानुरोधात्तइसन्ह्यफलंददातीश्वरस्तप्रपक्वात्रसेवानवैषम्यादिभाजोभवंतीत्याह अथेत्यादिधर्मस्यत्वर्थः फलं

मत्युरुवाच याकाचिदेवचेष्टास्यात्सर्वाकालप्रचोदिता सर्वमेवैतदुक्तंहिमयालुब्धककाननतः ६५ तस्मादुभौकालवशावावांनिर्दिष्टकारिणौ
नावांदोषेणगंतव्यौत्वयालुब्धककर्हिचित ६६ भीष्मउवाच अथोगम्यकालस्ततस्मिन्धर्मार्थसंशये अब्रवीत्सर्पगंमत्युंलुब्धंचार्जु
नकंतथा ६७ कालउवाच नह्यहंनाप्ययंमत्युर्नायंलुब्धकपन्नगः किल्बिषीजंतुमरणेनवयंहिप्रयोजकाः ६८ अकरोद्यदयंकर्म्मतन्नो
र्जुनकचोदकं विनाशहेतुर्नान्योस्यवध्यतेयंस्वकर्म्मणा यदनेनकृतंकर्म्मतेनायंनिधनंगतः विनाशहेतुः कर्म्मास्यसर्वेकर्म्मवशावयं ७०
कर्म्मदायादवांल्लोकः कर्मसंबंधलक्षणः कर्म्माणिचोदयंतीहयथान्योन्यंतथावयं ७१ यथामृत्पिंडतः कर्त्ताकुरुतेयद्यदिच्छति एवमा
त्मकृतंकर्म्ममानवः प्रतिपद्यते ७२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्रविषयेसर्वस्यकर्त्तुः पारतंत्र्यादधर्मवत्धर्मोपिकिंफलदस्यातिनवेतिसंशयेछेत्तयेत्र्यब्रवीत्कालः ६७ संगिनामेवधर्माधर्मफलंभवतिनत्वसंगानामस्माकमित्याशयवानाहनहीति ७०
कर्मैवदायादः पुत्रवत्तत्तारकंतद्वान् कर्मसंबंधः कर्मफलयोगः तदेवलक्षणंउणपावन्नान्नपकंयस्यतथा ७२ ॥ ॥ ॥ ॥

७४ कर्मैवन्नत्पयः कारणंपेयांतानलोकान्स्वर्गनिरकादीन् ७६ तत्कर्मपुत्रशोकपदं ७८ आख्यपिका फलमाहहाभ्यांएतदिति ८१ इतिश्रीमत्सदगाक्षप्रमाणामपरिधुरंधरस्वतद्दुरिवंशां
वतंसगोविंदसूरिसूनोर्नीलकंठस्यकृतोभारतभावदीपेदानधर्मीर्थप्रकाशेप्रथमोध्यायः अनिवार्यस्यापिमृत्योर्नियंतृत्वरेता: कथेति गृहस्थस्त्वतिथिभक्तेवंरतुयती स्यातिध्यक्ष

द्
नमुज्ञगोर
यथाछायातयोनित्यंसुसंबंधोनिरंतरं तथाकर्म्मचकर्त्ताचसंबद्धावात्मकर्म्मभिः ७३ एवंनाहंनवैमृत्युर्नसर्पोनतथाभवान् नचेयंब्राह्मणीवृद्धाशिशुर्वा
त्रकारणं ७४ तस्मिंस्तथाब्रुवाणेतुब्राह्मणीगौतमीनृप स्वकर्म्मप्रत्ययांल्लोकान्मत्वार्जुनकमब्रवीत् ७५ गौतम्युवाच नैवकालोनमृत्युरिह्का
रणं स्वकर्म्मभिरयंबालः कालेननिधनंगतः ७६ मयाचतत्कृतंकर्म्मयेनायंमेमृतः सुतः यातुकालस्तथामृत्युर्मुंचार्जुनकपन्नगं ७७ भीष्म
उवाच ततोयथागतंजग्मुर्मृत्युः कालोथपन्नगः अभूद्विशोकोर्जुनकोविशोकाचैवगौतमी ७८ एतच्छ्रुत्वाशमंगच्छमाभूः शोकपरोनृपः स्वक
र्म्मप्रत्ययांल्लोकान्सर्वेगच्छंतिवैनृप ७९ नैवत्वयाकृतंकर्म्मनापिदुर्योधनेनवै कालेनतत्कृतंविद्धिनिहतापेनपार्थिवाः ८० वैशं० अपेतद्वचनं
श्रुत्वाबभूवविगतज्वरः युधिष्ठिरोमहातेजाः पप्रच्छेदंचधर्म्मवित् ८१ इतिदानधर्मेगौतमीलुब्धकव्यालमृत्युकालसंवादः १ युधिष्ठिरउवाच पिता
महमहाप्राज्ञसर्वशास्त्रविशारद: श्रुतंमेमहदाख्यानमिदंमतिमतांवर १ भूयस्त्वोतुमिच्छामि धर्मार्थसहितंनृप कथ्यमानंत्वयाकिंचित्तन्मेव्याख्या
तुमर्हसि २ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

शंसार्थोयमध्यायः पितामहेत्यादि १ धर्मेणैवत्वर्थेप्रयोजनंयत्रतादृशया कथयासहितंकिंचिदाख्यानंश्रोतुमिच्छामीत्यर्थः २ ॥ ॥ ॥ ॥ ॥ ॥

नत्वेनपाथ्यातथ्येन नत्वात्मवयोनवननादिवहुभूताथ्यत्वेन १४ दुर्गतः दरिद्रः १७

केनमृत्युर्गृहस्थेनधर्म्मोमाश्रित्यनिर्ज्जितः इत्येतत्सर्वमाचक्ष्वतत्त्वेनापिचपार्थिव ३ भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनंयथामृत्यु
र्गृहस्थेनधर्ममाश्रित्यनिर्जितः ४ मनोःप्रजापतेराजन्निक्ष्वाकुरभवत्सुतः तस्यपुत्रशतंजज्ञेनृपतेःसूर्यवर्चसः ५ दशमस्तस्यपुत्रस्तुदशाश्वोनामभा
रत माहिष्मत्यामभूद्राजाधर्मात्मासत्यविक्रमः ६ दशाश्वस्यसुतस्त्वासीद्राजापरमधार्मिकः सत्येतपसिदानेचयस्यनित्यंरतंमनः ७ मदिराश्व [illegible] इति
ख्यातःपृथिव्यांपृथिवीपतिः धनुर्वेदेचवेदेचनिरतोयोभवत्सदा ८ मदिराश्वस्यपुत्रस्तुद्युतिमान्नामपार्थिवः महाभागोमहातेजामहासत्वो[illegible]
[illegible]महावलः ९ पुत्रोद्युतिमतस्त्वासीद्राजापरमधार्मिकः सर्वलोकेषुविख्यातः सुवीरोनामनामतः १० धर्मात्माकोषवांश्चापिदेवराजइवाप
रः सुवीरस्यतुपुत्रोभूत्सर्वसंग्रामदुर्जयः ११ सदुर्जयइतिख्यातः सर्वशस्त्रभृतांवरः दुर्जयस्येंद्रवपुषःपुत्रोग्निसदृशद्युतिः १२ दुर्योधनोना
ममहाराजाराजर्षिसत्तमः तस्येंद्रसमवीर्यस्यसंग्रामेष्वनिवर्तिनः १३ विषयेवासवस्तस्यसम्यगेवप्रवर्षति रत्नैर्धनैश्चपशुभि[illegible]ः सस्यैश्चा
पिपृथग्विधैः १४ नगरंविषयश्चास्यप्रतिपूर्णस्तदाभवत् नतस्यविषयेचाभूत्कृपणोनापिदुर्गतः व्याधितोवाकृशोवापितस्मिन्नाभून्नरःक्वचि
त् १५ सुदक्षिणोमधुरवागनसूयुर्जितेंद्रियः धर्मात्मानानृशंसश्चविक्रांतोथाविकत्थनः १६ यज्वावदान्योमेधावीब्रह्मण्यःसत्यसंगरः न
चावमंतादाताचवेदवेदांगपारगः १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२० चकमेकामयामास २१ असवर्णः अहृत्निपः [illegible] नदित्सतिनसुतमिच्छति २२ विततेत्रेतान्यिसाध्येनष्टः अदर्शनंगतः २८ कार्यंप्राप्तः ३१ दिशंश्रिणांविजयताव्रिव्रेन

द्रगाभव २

तंनर्म्मदादेवनदीसुरापाशीतलाशिवा चकमेपुत्रवद्याग्रंतेनभावेनभारत १८ तस्यांजज्ञेतदानद्यांकन्याराजीवलोचना नाम्नासुदर्शनाराजन्
रूपेणावसुदर्शना १९ तादृग्रूपाननारीषुभूतपूर्वायुधिष्ठिर दुर्योधनसुतायाहृग्वर्णिनी २० तामग्निश्चकमेसाक्षाद्राजकन्यांसुदर्शनां भूत्वाचब्रा
ह्मणोराजन्वरयामासतंनृपं २१ दरिद्रश्चासवर्णश्चममायमितिपार्थिव नदित्सतिसुतांतस्मैतांविप्रायसुदर्शनां २२ ततोस्यविततेयज्ञेनष्टोभू
द्धव्यवाहनः ततःदुःखितोराजावाक्यमाहद्विजांस्तदा २३ दुष्कृतंममकिंतस्यात्भवतांवाद्विजर्षभाः येननाशंजगामाग्निः कृतंकुपुरुषे
ष्विव नत्स्वंदुष्कृतंनोस्तियेनाग्निर्नाशमागतः भवतांवाथवामन्येतत्वेनैतद्विमृष्यतां २५ ततराज्ञोवचःश्रुत्वाविप्रास्तेभरतर्षभ नियतावाग्यतादे
वपावकंशरणंययुः २६ तान्दर्शयामासतदाभगवान्हव्यवाहनः स्वंरूपंदीप्तिमत्कृत्वाशरदर्कसमद्युतिः ततोमहात्मातानाहदहनोब्राह्मणर्ष
भान् वरयाम्यात्मनोर्थायदुर्योधनसुतामिति २८ ततस्तेकल्यमुत्थायतस्मैराज्ञेन्यवेदयन् ब्राह्मणाविस्मिताः सर्वेयदुक्तंचित्रभानुना २९
ततः सराजातच्छ्रुत्वावचनंब्रह्मवादिनां अवाप्यपरमंहर्षंतथेतिप्राहबुद्धिमान् ३० अयाचततंशुल्कंभगवंतंविभावसुं नित्यंसान्निध्यमिहतेचि
त्रभानोभवेदिति तमाहभगवानग्निरेवमस्त्वितिपार्थिवं ३१ ततः सान्निध्यमद्यापिमाहिष्मत्यांविभावसोः दृष्टंहिसहदेवेनदिशंविजयतातदा ३२

मिच्छता ३२ " " " " " " " " " " " " " " " " "

आन्हतंनवंवासोयस्यांसता ३३ वसोर्धारांसंततांघृतधारां ३४ गर्भेषुत्रइत्ताने ३५ हर्यांसहितंसदृशंवक्त्रं दर्शोदरेवक्त्रोउपमामार्दश्यंयस्यसम्पूर्णौरुसदृशोपमः ३६

ततस्तांसमलंकृत्यकन्यामाहतवाससं ददौदुर्योधनोराजापावकायमहात्मने ३३ प्रतिजग्राहवाग्निस्तुराजकन्यांसुदर्शनां विधिनावेददृष्टेन
वसोर्धारामिवाध्वरे ३४ तस्याहूपेणशीलेनकुलेनवपुषाश्रिया अभवत्प्रीतिमानग्निर्गर्भंचास्यांमनोदधे ३५ तस्यांसमभवत्पुत्रोनाम्नाग्नेयः
सुदर्शनः सुदर्शनस्तुरूपेणपूर्णेन्दुसदृशोपमः ३६ शिशुरेवाध्यगात्सर्वंपरंब्रह्मसनातनं अथौघवान्नामनृपोनृगस्यासीत्पितामहः ३७ तस्या
प्योघवतीकन्यापुत्रश्चौघरथोभवत् तामोघवान्ददौतस्मैस्वयमोघवतींसुतां ३८ सुदर्शनायविदुषेभार्यार्थेदेवरूपिणीं सगृहस्थाश्रमरतस्त
यासहसुदर्शनः ३९ कुरुक्षेत्रेवसद्राजन्नोघवत्यासमन्वितः गृहस्थश्चावजेष्यामिमृत्युमित्येवसप्रभो ४० प्रतिज्ञामकरोद्धीमान्दीप्ततेजाविं
शांपते तामथौघवतींराजन्सपावकसुतोब्रवीत् ४१ अतिथेः प्रतिकूलंतेनकर्तव्यंकथंचन येनयेनचतुष्येतनित्यमेवत्वयातिथिः ४२ अ
प्यात्मनः प्रदानेननतेकार्याविचारणा एतद्व्रतंममसदाहृदिसंपरिवर्तते ४३ गृहस्थानांचसुश्रोणिनातिथेर्विद्यतेपरं प्रमाणंयदिवामोरु
वचस्तेममशोभने ४४ इदंवचनमव्यग्राहृदित्वंधारयेःसदा निष्क्रांतेमयिकल्याणिसन्निधौमयिनिहितेनघे ४५ नातिथिस्तेवमंतव्यःप्रमाणंय
द्यहंतव तमब्रवीदोघवतीतथामूर्ध्निकृतांजलिः नमेत्वद्वचनात्किंचिन्नकर्तव्यंकथंचन ४६ ॥ ॥ ॥ ॥

गृहस्थश्चगृहस्थएव ४० प्रतिज्ञामेवाह अतिथेरिति ४१ आत्मनःशरीरस्य ४२ प्रमाणंहितज्ञापकं ४ किंचिन्नकर्तव्यंइतिनञ्चपितकर्तव्यमेव ४६ ॥ ॥

१४तः तस्याप्यसद्गृहे त्वगमत सदागार्हस्थ्यकाले तदर्थमाहरणकाले ४७ ब्राह्मणः तद्रूपीमृत्युः ५१ तामिति एतत्तरतप्रदानं ५२ राज्ञि राजकन्ये ५३ छंद्यमानः प्रलो

जिगीषमाणस्तुगृहेतदामृत्युः सुदर्शनं पृष्टतोन्वगमद्राजंल्लोभान्वेषीतदासदा ४७ इध्मार्थंतुगतेतस्मिन्नग्निपुत्रेसुदर्शने अतिथिर्ब्राह्मणःश्री
मांस्तामाहौघवतींतदा ४८ आतिथ्यंकृतमिच्छामित्वयाद्यवरवर्णिनी प्रमाणंयदिधर्मस्तेगृहस्थाश्रमसंमतः ४९ इत्युक्तातेनविप्रेणराजपुत्रीय
शस्विनी विधिनाप्रतिजग्राहवेदोक्तेनविशांपते ५० आसनंचैवपाद्यंचतस्मैदत्वाद्विजायसा प्रोवाचौघवतीविप्रंकेनार्थः किंददामिते ५१ तामब्रवी
त्ततोविप्रोराजपुत्रींसुदर्शनां त्वयाममार्थः कल्याणिनिर्विशंकेनतदाचर ५२ यदिप्रमाणंधर्मस्तेगृहस्थाश्रमसंमतः प्रदानेनात्मनोराज्ञिकर्त्तु
मर्हसिमेप्रियं ५३ सतयाछंद्यमानोन्यैरीप्सितैर्नृपकन्यया नान्यमात्मप्रदानात्सतस्यावव्रेवरंद्विजः ५४ साऽतुराजसुतास्मृत्वाभर्तुर्वचनमादितः
तथेतिलज्जमानासातमुवाचद्विजर्षभं ५५ ततोविहस्यविप्रर्षिःसाचैवोपविवेशह संस्मृत्यभर्तुर्वचनंगृहस्थाश्रमकांक्षिणः ५६ अथेध्मान
मुपादायसपावकिरुपागमत् मृत्युनारौद्रभावेननित्यंबंधुरिवान्वितः ५७ ततस्त्वाश्रममागम्यसपावकसुतस्तदा तांव्याजहारौघवतींक्वासि
पा तेतिचासकृत ५८ तस्मैप्रतिवचः साऽतुभर्त्रेनप्रददौतदा कराभ्यांतेनविप्रेणस्पृष्टाभर्तृव्रतासती ५९ उच्छिष्टास्मीतिमन्वानालज्जि
ज्जिताभर्तुरेवच तूष्णींभूताभवत्साध्वीनचोवाचाथकिंचन ६० अथतांपुनरेवेदंप्रोवाचसहसुदर्शनः क्वासासाध्वीक्वसायातागरीय
पः किमत्तोमम ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भ्यमानः ५४ भर्तृर्वचनंयेनयेनतुष्येत्तन्निस्समेवप्रदातिथि अथात्मनः प्रदानेनतेकार्यविचारणेतिसर्वोक्तं ५५ विवेशगृहमितिशेषः विहस्येसत्रहः सहेतिपाठः स्पष्टार्थः ५६ अथेधर्पर्थ्य
नीत्यादित्र्याहत्र्यथेतिपद ६१ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥

टी० ८

६२ अनपात्वभार्यपाछ्यमानः प्रार्थ्यमान इतिवै परीप्सोक्तिः ६३ अनेनेमैथुनरूपेणामामर्च्छतिमांन्प्रयाति अनुरूपंस्त्रीपुर्षगानुगांदंडं ६४ कूदमुद्गरोलोहदंडः हीनप्रतिज्ञंत

स्म ४

पतिव्रतामस्यशीलानित्यंचैवार्जवेरता कथंनवत्सदेत्यघस्मपमानापयापुरा ६२ उदंकस्यरूतंविप्रःप्रत्युवाचसदर्शनं अतिथिंविद्धिसंप्राप्तं

ब्राह्मणंपावकेचमां ६२ अनयाछंयमानोहंभार्ययातवसत्तम तैस्तैरतिथिसत्कारैर्ब्रह्मन्नेषाहृतामया ६३ अनेनविधिनासेयंमामर्च्छति

शुभाननं अनुरूपंयदत्रान्यत्तद्भवान्कर्तुमर्हति ६४ कूटमुद्गरहस्तस्तुमृत्युस्तंवैसमन्वगात् हीनप्रतिज्ञमत्रैनंवधिष्यामीतिचिंतयन् सुद

र्शनस्तुमनसाकर्मणावचसागिरा त्यक्तेर्ष्यःसक्तमन्युश्चस्मयमानोब्रवीदिदं ६६ सुरतंतेस्तुविप्राग्र्यप्रीतिर्हिपरमामम गृहस्थस्यहिधर्मोग्र्यसं

प्राप्तातिथिपूजनं ६७ अतिथिःपूजितोयस्यगृहस्थस्यतुगच्छति नान्यस्तस्मात्परोधर्मइतिप्राहुर्मनीषिणः ६८ प्राणाहिममदाराश्चयच्चान्य

द्विद्यतेवसु अतिथिभ्योमयादेयमितिमेव्रतमाहितं निःसंदिग्धंयथावाक्यमेतन्मेसमुदाहृतं तेनाहंविप्रसत्येनस्वयमात्मानमालभे ७० पृथि

वीवायुराकाशमापोज्योतिश्चपंचमं बुद्धिरात्मामनःकालोदिशश्चैवगुणादश ७१ नित्यमेतेहिपश्यंतिदेहिनांदेहसंश्रिताः सुकृतंदुष्कृतंचापिकर्म

धर्मभृतांवरः ७२ यथैषानानृतावाणीमयाद्यसमुदीरिता तेनसत्येनमांदेवाःपालयंतुदहंतुवा ७३ ततोनादःसमभवद्दिक्षुसर्वासुभा

रत असकृत्सत्यमित्येवंनैतन्मिथ्येतिसर्वतः ७४ उदंकातुनिष्क्रांतस्तस्माद्विश्वकामससवैद्विजः वपुषा द्यांचभूमिंचव्याप्यवायुरिवोद्यतः ७५ ॥

घी

क्तातिथिव्रतं ७० गुणाः इंद्रियाणि तदभिमानिन्योदेवताः दृष्ट्वा ययाइसर्वैः ७५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

आ १

॥ एम०

८

शैक्रिरामउरत्नादिधर्मवित्ता ८१ अहैलेति अोघवतीनाममदीभविष्यतीतिशेषः ८२ योगोहीति योगसिद्धेपसिद्धयमनः शरीरीहयंकरीष्यतीत्यर्थः ८४ पंचेति स्थूलभूतान्यतिक्र

त्वेरेणविभुः शैक्रेराज्ञीश्लोकाननुनादयन उवाचैवेनंधर्म्मेज्ञंपूर्वमामंत्र्यनामतः ७६ धर्मोहमस्मिभद्रंतेजिज्ञासार्थंत्वानघ प्राप्तः सत्यंच
तेज्ञात्वाप्रीतिर्मेपरमात्वयि विजितश्चत्वयामत्युर्योयंत्वामनुगच्छति रंध्रान्वेषीत्वसदात्वयाऽसौवशीकृतः ७८ नचास्तिशक्तिर्देवेलोके
कस्यचिस्पुरुषोत्तम पतिव्रतामिमांसाध्वींतवोद्दीक्षितुमप्युत ७९ दुहितात्वद्गुणैरेषापतिव्रतगुणैस्तथा अधष्यायदिदंब्रूपात्तथातत्ता
न्यथाभवेत ८० एषाहितपसासेनसंयुक्ताब्रह्मवादिनी पावनार्थंचलोकस्यसरिच्छ्रेष्ठाभविष्यति ८१ अनेनचैवदेहेनलोकांस्त्वमिह
पत्स्यसे अर्द्धेनौघवतीनामत्वामर्द्धेनानुयास्यति ८२ शरीरेणमहाभागायोगोह्यस्यवशेस्थितः अनयासहलोकांश्चगंतासितपसाजितान
८३ प्रत्रनावर्त्तिमभ्येतिशाश्वतांस्तान्सनातनान अनेनचैवदेहेनलोकांस्त्वमभिपत्स्यते निर्जितश्चत्वयामत्युरैश्वर्यंचनवोत्तमं पं
चभूतान्यतिक्रांतः स्ववीर्याच्चमनोजवः ८५ गृहस्थधर्म्मेणानेनकामक्रोधौचतेजितौ स्नेहोरागश्चतन्द्रीचमोहोद्रोहश्चकेवलः ८६ त
वशुश्रूषयाराजन्राजपुत्र्याविनिर्जिताः भीष्मउवाच शुक्लानांतुसहस्रेणवाजिनांरथमुत्तमं युक्तंप्रगृह्यभगवान्वासवोप्याजगामतं ८७
मत्युरात्मावल्लोकाश्चजिताभूतानिपंचच बुद्धिः कालोमनोव्योमकामक्रोधौतथैवच ८९ ॥श्रीरामरामतारकं॥ ॥श्रीरामायतन

पश्चाद्द्रातिवाहिकानसूक्ष्मभूतमयान्लोकान्प्राप्स्यसीत्यर्थः ८५ रागत्वित्यपिराजत्वातराजन्नामात्वाह्रासंबोधनं ८७ बुद्धिरित्यादावपिजितेत्यनुषंगः ॥ ८९ ॥ ॥ ॥

आख्यापिकात्तामर्यमाहतस्मादिति ८९ क्रतुशतेनापितत्तुल्यं किं तत्ततोप्यधिकमित्यर्थः यद्वा तत्क्रतुशतेनेति प्रथमातृतीययोर्व्यत्यासस्ते न क्रतुशतमपि तत्तुल्यमित्यर्थः ९१ म
अतिथिः योत्र पूजयेत्तस्मै दुःखातें दत्वा ९२ उभयत्तामतिमिच्छता ९४ द्वितीयोध्यायः ब्राह्मण्यं ५ ऋचीकस्यात्मजः इत्यत्रास्तुतीगन्तात्मजः इति बोध्यं सोऽजीगर्त्तसौयव

तस्माद्गृहाश्रमस्थस्य नान्यद्दैवतमस्ति वै अतिथिं नरव्याघ्र मनसैतद्विचारय ८९ अतिथिः पूजितो यद्धि ध्यायते मनसा शुभं न तत्क्रतुशतेना
पि तुल्यमाहुर्मनीषिणः ९० पात्रं त्वतिथिमासाद्य शीलाढ्यं यो न पूजयेत स दत्वा सुकृतं तस्य पुण्यमादाय गच्छति ९१ एतत्ते कथितं पुत्र मया
ख्यानमनुत्तमं यथा हि विजितो मृत्युर्गृहस्थेन पुराभवत् ९२ धन्यं यशस्यमायुष्यमिदमाख्यानमुत्तमं बुभूषताभिमंतव्यं सर्वदुश्चरितापहं ९३
इदं च कथयेद्विद्वानहन्यहनि भारत सुदर्शनस्य चरितं पुण्यान्लोकानवाप्नुयात् ९४ इति दानधर्मे सुदर्शनोपाख्यानं २ युधिष्ठिर उवाच
ब्राह्मण्यं यदि दुःप्राप्यं त्रिभिर्वर्णैर्नराधिप कथं प्राप्तं महाराज क्षत्रियेण महात्मना १ विश्वामित्रेण धर्मात्मन् ब्राह्मणत्वं नरर्षभ श्रोतुमिच्छामि
तत्त्वेन तन्मे ब्रूहि पितामह २ तेन ह्यमितवीर्येण वसिष्ठस्य महात्मनः हतं पुत्रशतं सद्यस्तपसा प्रपितामह ३ यातुधानाश्च बहवो राक्ष
सास्तिग्मतेजसः मन्युनाविष्टदेहेन सृष्टाः कालांतकोपमाः ४ महान्कुशिकवंशश्च ब्रह्मर्षिशतसंकुलः स्थापितो नरलोकेस्मिन्विद्वान्ब्राह्मण
संस्तुतः ५ ऋचीकस्यात्मजश्चैव शुनःशेपो महातपाः विमोक्षितो महासत्रात्पशुतामप्युपागतः ६ ॥ ॥ ॥ ॥ ॥

विमर्षिमशानपापरोतं तस्य हव्यः पुत्रान्याह शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति श्रुतेः शुनःशेपस्य पिता अजीगर्त इत्यवगमात् कन्यांतराभिप्रायेण वा इदं द्रष्टव्य ६ ॥

देवांस्तोषयित्वा तैर्मोक्षितः सत्यव्रतो विश्वामित्रस्यानुसंधास इति संबंधः ७ नाभिवादयते नमस्कुर्वंति सुपुत्स्वात्लोप आर्षः देवशतं देवैर्विश्वामित्रापदत्तं तेन च जप्येष्टकृतं [illegible] श
सायेनेति शेषः ८ बंधुभिर्मुक्तः वसिष्ठशापेन चंडालतां गतस्तान् दिव्यं येन नीतः १० पंचचूडाः ब्रह्मयमेदायस्याः सा चूडावलयमे देह्या दिति मेधितो ११ यामिति

हरिश्चंद्रकृतौ देवांस्तोषयित्वात्मतेजसा पुत्रतामनुसंप्राप्तो विश्वामित्रस्य धीमतः ७ नाभिवादयते स्मेष्टं देवराजं नराधिपं उग्राः पंचाशदेवापि
शप्तास्त्वपंचतां गताः ८ त्रिशंकुर्बंधुभिर्मुक्त ऐक्ष्वाकुः प्रीतिपूर्वकं स्ववाक्शिरा दिवं नीतो दक्षिणामाश्रितो दिशं ९ विश्वामित्रस्य विपु
लानदी देवर्षिसेविता कौशिकी च शिवा पुण्या ब्रह्मर्षिसुरसेविता १० तपोविघ्नकरी चैव पंचचूडा सुसंमता रंभानामाप्सराः शापाद्यस्य
शैलत्वमागता ११ तथैवास्य भयाद्बद्ध्वा वसिष्ठः सलिले पुरा आत्मानं मज्जयन् श्रीमान् विपाशः पुनरुत्थितः १२ तदाप्रभृति पुण्या हि
विपाशाभून्महानदी विख्याता कर्मणा तेन वसिष्ठस्य महात्मनः १३ वाग्भिश्च भगवान्येन देवसेनाग्रतः प्रभुः स्तुतः प्रीतमनाश्चासीच्छाप
श्चैनममुंचत १४ ध्रुवस्योत्तानपादस्य ब्रह्मर्षीणां तथैव च मध्ये ज्वलति यो नित्यमुदीचीमाश्रितो दिशं १५ तस्यैतानि च कर्माणि तथान्या
नि च कौरव क्षत्रियस्येत्यतो जातमिदं कौतूहलं मम १६ किमेतदिति तत्त्वेन प्रब्रूहि भरतर्षभ देहांतरमनासाद्य कथं स ब्राह्मणो भवत् १७

त्रिशंकुं याजयन् विश्वामित्रो वसिष्ठपुत्रैः शप्तः श्वपचस्य याजकस्त्वं श्वपचो भविष्यसीति तं शापमस्तं कर्तुं विश्वामित्रः कस्माच्चिदाय दिव्यतो धनो वीर्ये णानीपित्वा पक्रमाणे नामिंद्रः श्येनरूपेणाह
तवानन्ताव नैवायं शापान्मुक्तो वर्षं चेति देवसेनानामग्रतः श्रेष्ठः इंद्रः १४ ज्वलनिताणरूपेण १७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
२१

दा० १०

मतंगस्य ब्राह्मण्यं च दुर्ज्ञातस्य चंडालस्य पथा महतापि तपसा ब्राह्मण्यमप्राप्यं जातं तत्तथैवैतन्मम भाति त्वं तद्यथा जातं तथा वदस्व १८ स्थाने युक्तं कथं ब्राह्मण्यमासवान् विश्वामित्र इति शेषः १९

एतत्तत्त्वेन मे तात सर्वमाख्यातुमर्हसि मतंगस्य यथा तत्त्वं तथैवैतद्वदस्व मे १८ स्थाने मतंगो ब्राह्मण्यं नालभद्भरतर्षभ चंडालयोनौ जातो हि कथं
ब्राह्मण्यमासवान् १९ इति दानधर्मे विश्वामित्रोपाख्याने ३ भीष्म उवाच श्रूयतां पार्थ तत्त्वेन विश्वामित्रो यथा पुरा ब्राह्मणत्वं गतस्तात ब्रह्म
र्षित्वं तथैव च १ भरतस्यान्वये चैवाजमीढो नाम पार्थिवः बभूव भरतश्रेष्ठ यज्वा धर्मभृतां वरः २ तस्य पुत्रो महानासीज्जह्नुर्नाम नरेश्वरः
दुहितृत्वमनुप्राप्ता गंगा यस्य महात्मनः ३ तस्यात्मजस्तुल्यगुणः सिंधुद्वीपो महायशाः सिंधुद्वीपाच्च राजर्षिर्बलाकाश्वो महाबलः ४ वल्लभस्त
स्य तनयः साक्षाद्धर्म इवापरः कुशिकस्तस्य तनयः सहस्राक्षसमद्युतिः ५ कुशिकस्यात्मजः श्रीमान्गाधिर्नाम जनेश्वरः अपुत्रः प्रसवेनार्थी
वनवासमुपावसत् ६ कन्या जज्ञे सुता तस्य वने निवसतः सतः नाम्ना सत्यवती नाम रूपेणाप्रतिमा भुवि ७ तां वव्रे भार्गवः श्रीमांश्च्यवनस्यात्मसं
भवः ऋचीक इति विख्यातो विपुले तपसि स्थितः ८ स तां न प्रददौ तस्मै ऋचीकाय महात्मने दरिद्र इति मत्वा वै गाधिः शत्रुनिबर्हणः ९ प्रत्या
ख्याय पुनर्यांतमब्रवीद्राजसत्तमः शुल्कं प्रदीयतां मह्यं ततो वत्स्यसि मे सुताम् १० ऋचीक उवाच किं प्रयच्छामि राजेंद्र तुभ्यं शुल्कम[illegible]हं न
प दुहितुर्ब्रूह्यसंसक्तो माभूत्तत्र विचारणा ११ ॥ ॥ ॥ ॥ ॥ ॥

त्रितीयः श्रूयतां ब्राह्मणोऽपि[illegible] ऋषित्वं मंत्रद्रष्टृत्वं गोत्रप्रवर्तकत्वं वा ४ बलाकाश्वो नाम्ना ५ प्रसवेन सोमाभिषवनिमित्तेन पुत्रार्थी पुत्रार्थी ६ सतः सोमा[illegible]भिषवोपलक्षिताद्यज्ञात्वनस्पद्रुम
विहितात्स्त्रीदृशी वनवासयोग्यो वकसा जज्ञे ७ भार्गवः भृगोर्गोत्रापत्यं ९ वत्स्यसि उद्वाहेन प्राप्स्यसि १० असंसक्तो निःसंशयः ११ ॥ ॥ ॥

दान० १०

एकतः एकं १२ आदित्यंअदितेः पुत्रं १४ छंदच्छदा २० वरेणापुत्रं तेद्यस्यामित्यनुग्रहेण २७

गाधिरुवाच चंद्ररश्मिप्रकाशानां हयानां वातरंहसां एकतः श्यामकर्णानां सहस्रं देहि भार्गव १२ भीष्म उवाच ततः स भृगुशार्दूल आ
वनस्यात्मजः प्रभुः अब्रवीद्वरुणं देवमादित्यं पतिमंभसां १३ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां सहस्रं वातवेगानां भिक्षे त्वां देव
सत्तम तथेति वरुणो देव आदित्यो भृगुसत्तमं उवाच यत्र ते छंदस्तत्रोपास्यंति वाजिनः १५ ध्यातमात्रऋचीकेन हयानां चंद्रवर्चसां गंगाजलात्स
मुत्तस्थौ सहस्रं विपुलौजसां १६ अदूरे कन्यकुब्जस्य गंगायास्तीरमुत्तमं अश्वतीर्थं तदद्यापि मानवैः परिचक्ष्यते १७ ततो वै गाधये तात सहस्रं
वाजिनां शुभं ऋचीकः प्रददौ प्रीतः शुल्कार्थं जयतां वरः १८ ततः स विस्मितो राजा गाधिः शापभयेन च ददौ तां समलंकृत्य कन्यां भृगुसुताय
वै १९ जग्राह विधिवत्पाणिं तस्या ब्रह्मर्षिसत्तमः सा च तं पतिमासाद्य परं हर्षमवाप ह स तुतोष च ब्रह्मर्षिस्तस्या वृत्तेन भारत छंदयामा
स चैवैनां वरेण वरवर्णिनी २१ मात्रे तत्सर्वमाचख्यौ सा कन्या राजसत्तम अथ तामब्रवीन्माता सुतां किंचिदवाङ्मुखी २२ ममापि पुत्रि
भर्त्ता ते प्रसादं कर्त्तुमर्हति अपत्यस्य प्रदानेन समर्थः स महातपाः २३ ततः सा त्वरितं गत्वा तत्सर्वं प्रत्यवेदयत् मातुश्चिकीर्षितं राजन्नृचीकस्तामथा
ब्रवीत् २४ गुणवंतमपत्यं सा अचिराज्जनयिष्यति मम प्रसादात्कल्याणि मा भूत्ते प्रणयोऽन्यथा २५ तव चैव गुणश्लाघी पुत्र उत्पत्स्यते महान् अ
स्मद्वंशकरः श्रीमान्सत्यमेतद्ब्रवीमि ते २६ ऋतुस्नाता च सा अश्वत्थं त्वं च वृक्षमुदुंबरं परिष्वजेयाः कल्याणि तत एवमवाप्स्यथः २७ ॥

२९ सर्वैरुपपन्नायाः मन्त्रैः सर्वं धात्रा पूर्वं उपपन्नायाः गुणसमन्वेन भासायाः तव भर्त्रे ये ऋपाहं गरीयसीत्यर्थः ४३ क्षत्रियः क्षत्रियवदुग्रकर्मा ४४ ॥ ॥ ॥

चरुद्वयमिदं चैवमंत्रपूतं मया शुचिस्मिते त्वंचसाचोपभुंजीतंततः पुत्रावावाप्स्यथः २८ ततः सत्यवतीं हृष्टामातरंप्रत्यभाषत पत्युर्ऋचीकेनकथितंतन्मयाव
र्यौचरुद्वयं २९ तामुवाचततोमातासुतांसत्यवतींतदा पुत्रिसर्वोपपन्नायाः कुरुष्ववचनंमम ३० मह्यंप्रयच्छयद्भर्त्रातेचरुः मंत्रपुरस्कृतः प्र
तंप्रयच्छमत्संबद्धंत्वंमदीयंचरुंगृहाणच ३१ यस्मात्वं ह्यपियोज्ञाधिकस्त्वावशुचिस्मिते यदिप्रमाणंवचनंममप्रमातुरनिंदिते ३२ स्वंप्रयत्नंविशिष्टंहिसर्वइच्छ
त्यनाविलं अतोभावतोचात्रकृतंमेवेभविष्यति ३३ ततोमेत्वष्ठरोभावः पादपेचसमध्यमे कथंविशिष्टोभ्रातामेभवेदित्येवचिंतय ३४ तथाच
कृतवत्यौतेमातासत्यवतीचसा अथगर्भावनुप्राप्तेउभेतेवैयुधिष्ठिर ३५ दृष्ट्वागर्भमनुप्राप्तांभार्यांसचमहानृषिः उवाचतांसत्यवतींदुर्मना
भृगुसत्तमः ३६ व्यत्यासेनोपयुक्तस्तेचरुर्व्यक्तंभविष्यति व्यत्यासः पादपेचापिसुव्यक्तंतेकृतः शुभे ३७ मयाहिविश्वंयद्ब्रह्मत्वच्चरौसन्निवेशि
तं क्षत्रवीर्यंचसकलंचरौतस्यानिवेशितं ३८ त्रैलोक्यविख्यातगुणंत्वंविप्रंजनयिष्यसि साचक्षत्रंविशिष्टंवैजनयिष्यतितत्कृतंमया ३९ व्यत्यासस्तु
कृतोयस्मात्त्वयामात्राचतेशुभे तस्मात्साब्राह्मणश्रेष्ठंमातातेजनयिष्यति ४० क्षत्रियंतूग्रकर्माणंत्वंभद्रेजनयिष्यसि नहितेतत्कृतंसाधुमातृस्नेहेन
भाविनि ४१ साश्रुत्वाशोकसंतप्तापपातवरवर्णिनीभूमौसत्यवतीराजनछिन्नेवरुचिरालता ४२ प्रतिलभ्यचसासंज्ञांशिरसाप्रणिपत्यच उवाचभा
र्यभर्तारंगाधेयीभार्गवर्षभं ४३ प्रसादयंत्यांभार्यायांमयिब्रह्मविदांवर प्रसादंकुरुविप्रर्षेनमेस्यात्क्षत्रियः सुतः ४४ ॥ ॥ ॥

६० विश्वात्मजा इति क्षत्रियात् ब्रह्मवादिनः कथमुत्पन्ना इत्याशंक्याह ऋचीकेनेति चरौ पूर्वं ब्रह्मैव आहितं अतः क्षत्रबीजो ऽपि ब्राह्मणपत्नीयोगात् बीजापेक्ष

कामं मम आत्मजं कर्म्मीयं यो त्रीभवितुमर्हति ततो मे स्यात्ततो ब्रह्मन्नेष मे दीयतां वरः ४५ एवमस्त्विति होवाच स्वां भार्यां स महातपाः ततः सा
जनयामास जमदग्निं सुतं शुभं ४६ विश्वामित्रं चाजनयद्गाधिभार्या यशस्विनी ऋषेः प्रसादाद्राजेन्द्र ब्रह्मर्षेर्ब्रह्मवादिनं ४७ ततो ब्राह्मणतां
यातो विश्वामित्रो महातपाः क्षत्रियः सोप्यथ तथा ब्रह्मवंशस्य कारकः ४८ तस्य पुत्रा महात्मानो ब्रह्मवंशविवर्द्धनाः तपस्विनो ब्रह्मविदो गोत्र
कर्त्तार एव च ४९ मधुच्छंदश्च भगवान् देवरातश्च वीर्य्यवान् अक्षीणश्च शकुंतश्च बभ्रुः कालपथस्तथा ५० याज्ञवल्क्यश्च विख्यातस्त वि ४
याः स्थूणो महाव्रतः उलूको यमदूतश्च तथर्षिः सैंधवायनः ५१ वल्गुजंघश्च भगवान् गालवश्च महानृषिः ऋषिर्वज्रस्तथा ख्यातः सालंकायन
एव च ५२ लीलाढ्यो नारदश्चैव तथा कूर्चमुखः स्मृतः वादुलिर्मुशलश्चैव वक्षोग्रीवस्तथैव च ५३ आंघ्रिको नैकदृक्चैव शिलायूपः शितः शुचिः ६८
चक्रको मारुतंतव्यो वातघ्नोथाश्वलायनः ५४ श्यामायनोथ गार्ग्यश्च जावालिः सुश्रुतस्तथा कारीषिरथ संश्रुत्यः परपौरवतंतवः ५५ महानृषिश्च
कपिलस्तथर्षिस्ताडकायनः ५५ तथैव चोपगहनस्तथर्षिश्चासुरायनः ५६ मार्दमर्षिर्हिरण्याक्षो जंघारिर्बाभ्रवायणिः सूतिर्विभूतिः सूतश्च सु
रक्तस्तु तथैव हि ५७ अरालिर्नाचिकश्चैव चांपेयोज्जयनौ तथा नवतंतुर्बकनखः सेयनो यतिरेव च ५८ अंभोरुहश्चारुमत्स्यः शिरीषी चाथ गा
र्दभिः ऊर्जयोनिरुदापेक्षी च नारदी च महानृषिः ५९ विश्वामित्रात्मजाः सर्वे मुनयो ब्रह्मवादिनः तथैव क्षत्रियो राजन् विश्वामित्रो महातपाः
यासंस्कारस्य बलवत्त्वात्तया हि द्रावाग्निदृग्धोप्यंधेवेन ६० ऋचीकेनाहितं ब्रह्म परमेतद्युधिष्ठिर एतत्ते सर्वमाख्यातं तत्त्वेन भरतर्षभ ६१ ॥ ॥ ॥ ॥
बीजंभप्र कारस्वीकांमेसतिमुराहरंतिनब्रह्मगपक्षत्रियायेरतपः कोपायेतपः कोपापिसभ्यतविश्वामित्रस्यतन्मासिमित्रीब्रह्मौदनाशनात ६१ ॥ ७ ॥ ७ ॥

दा० ६२ चतुर्थः सर्वं तु ऽपापमपि ब्राह्मणेष्वानृशंस्यं विनार्थमित्याशयवानानृशंस्याधापमारभते आनृशंस्यमस्येति २ विषये देशे कोऽपि वा० ३ तत्र मृगयायां ४ दुर्वितताद्बाणाद्
१२ वीर्यशल्येनाभिभिन्नाद्बकृतात्वपलं कुलितपत्रकलितद्रुमपीसेन ५ दिग्धेन लिप्तेन ७ द्विजः पक्षी आनृशंस्यं १ १२ दुः खेन दुःखितं १० विरमत्याश्चर्यमिति वैयाघ्र

विश्वामित्रस्य वै जन्म सोमस्य पौत्रितेजसः पप्रच्छ च स संदेहो भूयस्ते राजसत्तम तत्र तत्र च मां ब्रूहि छेत्ता स्मित वसंशयान ६१ इति दानधर्मे विश्वामित्रोपाख्याने ४ युधिष्ठिर उवाच आनृशंस्यस्य धर्मज्ञ गुणान्भक्तजनस्य च श्रोतुमिच्छामि धर्मज्ञ तन्मे ब्रूहि पितामह १ भीष्म उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं वासवस्य च संवादं शुकस्य च महात्मनः २ विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः सविषं कांडमादाय मृगयामास वै मृगं ३ तत्र चामिषलुब्धेन लुब्धकेन महावने अविदूरे मृगान्दृष्ट्वा बाणः प्रतिसमाहितः ४ तेन दुर्वारितास्त्रेण निमित्तचपलेषुणा महान्वनतरुस्तत्र विद्धो मृगजिघांसया ५ स तीक्ष्णविषदिग्धेन शरेणातिबलात्कृतः उत्सृज्य फलपत्राणि पादपः शोषमागतः ६ तस्मिन्वृक्षे तथाभूते कोटरेषु चिरोषितः न जहाति शुको वासं तस्य भक्त्या वनस्पतेः निष्प्रचारो निराहारो ग्लानः शिथिलवागपि कृतज्ञः सह वृक्षेण धर्मात्मा सोऽप्यशुष्यत ८ तमुदारं महासत्त्वमतिमानुषचेष्टितं समदुःखसुखं दृष्ट्वा विस्मितः पाकशासनः ९ ततश्चिंतामुपगतः शक्रः कथमयं द्विजः तिर्यग्योनावसंभाव्यमानृशंस्यमवस्थितः १० अथवा नात्र चित्रं हि ह्यभवद्वासवस्य तु प्राणिनामपि सर्वेषां सर्वं सर्वत्र दृश्यते ११ ततो ब्राह्मणवेषेण मानुषं रूपमास्थितः अवतीर्य महीं शक्रस्तं पक्षिणमुवाच ह १२ शुक भोः पक्षिणां
तिर्यगादीनां सर्वत्र जातो सर्वं कृपानो बुर्यादिकं १२ दाक्षेपीरक्षदौहित्रीशुकीनाम १३ ॥ श्रेष्ठ दाक्षेपी साधु जातस्त्वया पृच्छे त्वां शुक कस्मान्न त्यजसि द्रुमं १३

॥ ॥ ॥ ॥ ॥ ॥

दा० १२

तपसाज्ञानदृसा १५ तांप्रीतिंहृदेनतसौहार्दं २१ अनुक्रोशस्यफलापितावैफल्यंतत्मनःइतिशेषः २५ संशयात्संशयंप्राप्यअतः संशयच्छेत्तृत्वात् २४ अद्यअसामर्थ्यकाले २६ संभवंसमगो

अथपृष्टः शुकः शक्रम् मूर्द्ध्नासमभिवाद्यतम् स्वागतंदेवराजत्वंविज्ञातस्तपसामया १४ ततोदशशताक्षेणसाधुसाध्वितिभाषितं अहोविज्ञानमित्येकंम
नसापूजितस्ततः १५ तमेवंशुभकर्म्माणंशुकंपरमधार्मिकं विजानन्नपितांप्रीतिंपप्रच्छवलसूदनः १६ निष्पत्रमफलंशुष्कमशरण्यंपतत्रि
णां किमर्थंसेवसेवृक्षंयदामहदिदंवनं १७ अन्येपिबहवोवृक्षाः पत्रसंछन्नकोटराः शुभाः पर्य्याप्तसंचाराविद्यन्तेस्मिन्महावने १८ गतायुष
ममामर्थ्यंक्षीणसारंहतश्रियं विमृश्यप्रज्ञयाधीरजहीमंस्थविरंद्रुमं १९ भीष्मउवाच तदुपश्रुत्यधर्म्मात्माशुकः शक्रेणभाषितं सुदीर्घमति
निश्वस्यदीनोवाक्यमुवाचह १९ अनतिक्रमणीयानिदैवतानिशचीपते यत्रभक्तस्तवश्रृणुतन्निबोधसुराधिप २० अस्मिन्नहंद्रुमेजातः सा
धुभिश्चगुणैर्युतः वालभावेनसंगुप्तः शत्रुभिश्चनधर्षितः २१ किमनुक्रोशवैफल्यमुत्पादयसिमेनघ आनृशंस्याभियुक्तस्यभक्तस्यानन्यगस
च २२ अनुक्रोशोहिसाधूनांमहद्धर्म्मस्यलक्षणं अनुक्रोशश्चसाधूनांसदाप्रीतिंप्रयच्छति २३ त्वमेवदैवतैः सर्वैः पृच्छसेधर्म्मसंशयान्
अतस्त्वंदेवदेवानामाधिपत्येप्रतिष्ठितः २४ नार्हसेमांसहस्राक्षद्रुमंत्याजयितुंविराट समर्थमुपजीवंतंत्यजेयंकथमद्यवै २५ तस्यवाक्ये
नसौम्येनहर्षितः पाकशासनः शुकंप्रोवाचधर्मात्माआनृशंस्येनतोषितः २६ वरंवृणीष्वेतिततः सचवव्रेवरंशुकः आनृशंस्यपरोनित्यंतस्यवृक्षस्यसंभवं २७

स्मृपूर्ववरंवव्रे २७ २७ २७ २७ पे२

दा० २९ आनृशंस्यफलमाह शुकश्चेति ३० आख्यायिकातात्पर्यमाह एवमिति ३१ अध्यायः पितामहेत्यादिरध्यायः दैवं मानुषमयीदं सर्वं पुरुषकारादृते न सिध्यतीति अवश्यं पुरुषकारेणो ज्ञाप्यं तत्र पुरुषकारे चेष्टा हर्षोत्थिना
१३ पतितव्यमित्येवं परः हयोः श्रेष्ठयोर्मध्ये किं अतिश्रेष्ठमित्यर्थः १ दैवं प्राक्कर्म मानुषं प्रांपतिकं कर्म ४ दैवश्रेष्ठमाह नावीजमिति ५ हलेनेवीजभृते सति ६ पुरुषकारश्रेष्ठत्वमाह य

विदित्वा च दृढां भक्तिं तां शुके शीलसंपदं प्रीतिः सिषमयो हृष्टमममेतेनावतिक्तवान् २८ ततः फलानि पत्राणि शाखाश्चापि मनोहराः शुकस्य हृदयं भक्त्वा शुभ्रमत्तां प्राप महाद्रुमः २९ शुकस्य कर्मणा तेन आनृशंस्येन तेन वै आयुषोऽन्ते महाराज प्राप शक्रसलोकतां ३० एवमेव मनुष्येन्द्र भक्तिमं तं समाश्रितः सर्वार्थसिद्धिं लभते शुकं प्राप्य यथा द्रुमः ३० इति श्रीशान्तौ दानधर्मे शुकवासवसंवादः ५ युधिष्ठिर उवाच पितामह महाप्राज्ञ सर्वशास्त्र विशारद दैवे पुरुषकारे च किंस्विच्छ्रेष्ठतरं भवेत् भीष्म उवाच अत्राप्युदाहरन्तीममितिहासं पुरातनम् वसिष्ठस्य च संवादं ब्रह्मणश्च युधिष्ठिर । दैवमानुषयोः किंस्वित् कर्मणः श्रेष्ठमुच्यते पुरा वसिष्ठो भगवान् पितामहमपृच्छत
२ ततः पद्मोद्भवो राजन् देवदेवः पितामहः उवाच मधुरं वाक्यमर्थवद्धेतुभूषितं ४ ब्रह्मोवाच नावीजं जायते किंचिन्न वीजेन विना फलं वीजाद्वी जं प्रभवति वीजादेव फलं स्मृतं ५ यादृशं वपते वीजं क्षेत्रमासाद्य कर्षकः सुकृते दुष्कृते वापि तादृशं लभते फलं ६ यथा वीजं विना क्षेत्रमुप्तं भवति निष्फलं त था पुरुषकारेण विना दैवं न सिध्यति ७ क्षेत्रं पुरुषकारस्तु दैवं वीजमुदाहृतम् क्षेत्रवीजसमायोगात्ततः सस्यं समृध्यते ८ कर्मणः फलनिर्वृत्तिं स्वय मश्नाति कारकः प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ९ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ४ ॥ ॥

यथेति ७ उभयापेक्षायामाह क्षेत्रमिति ८ सिद्धान्तः कर्मण इत्यादिना निर्वृत्तिं निष्पत्तिम् ॥ ९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ शा० १३

११ कर्मदैवयोः प्राबल्यदौर्बल्ये उपसंहरति प्राप्यतइति १३ मानुष्यात्मानुष्यमुद्दिश्य १५ लभतेऽपिपरमितिसर्वत्रसंबंधः १७ शिष्टाचारोऽपिकर्मणांप्राबल्येमानमित्याहयेनेति १८
ननुनिश्चितं १९ अकृत्वेति केवलंदैवंनिष्फलमित्यर्थः २० नतथेति दैवदोषात्ऐहिकीहानिः स्यात्सा पुरुषकारदोषात्परलोकहानिर्दुरंतेत्यर्थः अन्येनपापेन

शुभेनकर्मणासौख्यंदुःखंपापेनकर्मणा कृतंफलतिसर्वत्रनाकृतंभुज्यतेक्वचित् १० कृतीसर्वत्रलभतेप्रतिष्ठांभाग्यसंयुतां अकृतीलभ
तेभ्रष्टः क्षतेक्षारावसेचनं ११ तपसारूपसौभाग्यंरत्नानिविविधानिच प्राप्यतेकर्मणासर्वंनदैवादकृतात्मना १२ तथास्वर्गश्चभोगाश्चनि
ष्ठायाचमनीषिता सर्वंपुरुषकारेणकृतेनेहोपलभ्यते १३ ज्योतींषित्रिदशानागायक्षाश्चंद्रार्कमारुताः सर्वेपुरुषकारेणमानुष्याद्देवतांगताः
१४ अर्थोवामित्रवर्गोवाऐश्वर्यंवाकुलान्वितं श्रीश्चापिदुर्लभाभोक्तुंतथैवाकृतकर्मभिः शौचेनलभतेविप्रः क्षत्रियोविक्रमेणतु वैश्यः
पुरुषकारेणशूद्रः शुश्रूषयाश्रियं १६ नादातारंभजंत्यर्थानक्लीबंनापिनिष्क्रियं नाकर्मशीलंनाशूरंतथानैवातपस्विनं येनलोकास्त्रयःसृष्टा
दैत्याःसर्वाश्चदेवताः सएषभगवान्विष्णुःसमुद्रेतप्यतेतपः १८ स्वंचेत्कर्मफलंनस्यात्सर्वमेवाफलंभवेत् लोकोदैवंसमालंब्यउदासी
नोभवेन्नतु १९ अकृत्वामानुषंकर्मयोदैवमनुवर्तते वृथाश्राम्यतिसंप्राप्यपतिंक्लीबमिवांगना २० नतथामानुषेलोकेभयमस्तिशुभा
शुभे यथात्रिदशलोकेहिभयमन्येनजायते २१ कृतःपुरुषकारस्तुदैवमेवानुवर्तते नदैवमकृतेकिंचित्कस्यचिद्दातुमर्हति २२ ॥

२१ अकृतेकर्मभावेसति आकस्मिकनिधिलाभादावपिकिंचित्कर्मास्त्येवेतिभावः २२

द्वि॰ पद्येतिस्थानानिइंद्रादिलोकास्त्वप्यनित्याः दृश्यंतेताराह्यपि ज्ञांदेवानांमध्यःपातदर्शनादित्यर्थः कर्मविनापुराणेनकर्मणाविनादैवंदैवमत्रमहः कथंस्थास्यति दैवमपिकर्मफलमेवेत्यर्थः २३ व्या
२७ पारंपुण्यरूपंयांतिअनुमोदंते उग्रंधर्मविघ्नकरं २४ विग्रहोवैरं तथाहिऋषीणांतपसिदेवाविघ्नमाचरंतिऋषयश्चच्यवनाद्यइंद्रादीनामपि भवंकुर्वंतीतिप्रोक्तमेवप्रसिद्धं यद्यप्येवंकर्मपर
त्वंदेवर्षीणामस्तितथापिअदैवंदैवाभावोनवक्तुंशक्यइत्यर्थः २५ अत्रमानामाहकथमितिपत्तोयस्माद्दैवंप्रवर्त्ततेतस्यकर्मणोपिदैवंविनाकथमुत्पत्तिः स्यान्नकथंमपि ७णपवंतस्वध

पृथास्थानान्यनित्यानिदृश्यंतेदैवतेष्वपि कथंकर्म्मविनादैवंस्थास्यतिस्थापयिष्यतः २३ नदैवतानिलोकेस्मिन्व्यापारंयांतिकस्यचित्
व्यासंगंजनयंत्युग्रमात्माभिभवशंकया २४ ऋषीणांदेवतानांचसदाभवतिविग्रहः कस्यवाचात्ददैवंस्याद्यतोदैवंप्रवर्त्तते २५ कथंतस्य
समुत्पत्तिर्यतोदैवंप्रवर्त्तते एवंत्रिदशलोकेपिप्राप्यंतेवह्वोगुणाः २६ आत्मैवस्यात्मनोबंधुरात्मैवरिपुरात्मनः आत्मैवत्यात्मनःसा
क्षीकृतस्याप्यकृतस्यच २७ कृतंचाप्यकृतंकिंत्कृतेकर्म्मणिसिद्ध्यति सत्कृतंदुःकृतंकर्म्मनयथार्थंप्रपद्यते २८ देवानांशरणंपु
ण्यंसर्वदुःखैरवाप्यते पुण्यशीलनरंप्राप्यकिंदैवंप्रकरिष्यति २९

वि२

मैंप्रवर्त्ततेधर्मोत्पुण्यांवहतितेअन्यथासर्वैपिधर्मैप्रवर्त्तेरन्नित्यर्थः एवंलोकवद्देवस्वर्गेपिगुणाः भोगाः यथावहुधनोन्यसावाणिज्येनभूयांसंलाभंलभतेनेतरइतिवदेतदितिभावः २६ आ
त्मेति एवंप्रवर्त्तेरपिदेवाधीनत्वेपिकर्मैवकर्त्तव्यमित्यर्थः कृतस्यपुण्यपापादेः २७ कृतमिति पुण्यमपिपापेनप्रतिहन्यतेवापमपिपुण्येनेतितयोः फलंयथोक्तंस्वर्गनरकंवानप्राप्नोतीत्य
र्थः २८ शरणंगृहं पौलस्त्यनोऽपराधः अस्तेनेनसत्कारेणापनीयतेएवंपमपिपुण्यातिशयान्प्रतिहन्यतेइत्यर्थः २९ ॥ राम ॥ राम ॥ राम ॥ राम॰

पा२

२५

अत्रैवार्थे दृष्टान्तानाह पुरेत्यादिना ३१ विपर्यये पि दृष्टान्तमाह अश्वेति ३३ मिथ्याभिधानेन अनुपयुक्तिर्वमाराणमित्येवं रूपेण रसातलप्राप्तिः तत्प्रसंगेस्तल्लमधोभागं ३५ पापमपि तेनेतीपसं
नदीप्याये त्याह शक्रस्येति द्वाभ्यां चरणौ द्विजस्त्रीहत्यारूपं कर्म कृत्वा प्रस्थित इति संबंधः ३७ पुराणमपि केषांचिन्नराणां येत्याह गोप्रदानेन कृकलासत्वं सरस्त्वं ३८ प्रीतिदापं

पुण्यप्राप्तिर्विभ्रष्टश्च्यावितः पतितः क्षितौ पुनरारोपितः स्वर्गं दौहित्रैः पुण्यकर्म्मभिः ३० पुरूरवाश्च राजर्षिर्द्विजैरभिहितः पुरा। से
लश्च अभिविख्यातः स्वर्गप्राप्तो महीपतिः ३१ अश्वमेधादिभिर्यज्ञैः सत्कृतः कोशलाधिपः महर्षिशापात्सौदासः पुरुषादत्वमागतः
३२ अश्वत्थामा च रामश्च मुनिपुत्रौ धनुर्द्धरौ न गच्छतः स्वर्गलोकं सुकृतेनेह कर्म्मणा ३३ बहुयज्ञशतैरिष्ट्वा द्वितीय इव वासवः मिथ्या
भिधानेनैकेन रसातलतलं गतः ३४ बलिर्वैरोचनिर्बद्धो धर्म्मपाशेन दैवतैः विष्णोः प्रयत्नकारेण पातालसदनः कृतः शक्रस्योज्ञ
म्य चरणं प्रस्थितो जनमेजयः द्विजस्त्रीणां वधं कृत्वा किं दैवेन न वारितः ६६ अज्ञानाद्ब्राह्मणं हत्वा स्पृष्टो बालवधेन च वैशंपायन विप्रर्षि
: किं दैवेन न वारितः ३७ गोप्रदानेन मिथ्या च ब्राह्मणेभ्यो महामखे पुरा नृगश्च राजर्षिः कृकलासत्वमागतः ३८ धुंधुमारश्च राजर्षिः स
त्रेष्वेव जरां गतः प्रीतिदायं परित्यज्य सुष्वाप स गिरिव्रजे ३९ पांडवानां हृतं राज्यं धार्त्तराष्ट्रैर्महाबलैः पुनः प्रत्याहृतं चैव न दैवाद्भुजसंश्रया
त् ४० तपोनियमसंयुक्ता मुनयः संशितव्रताः किं ते दैवबलाच्छापमुत्सृजन्ते न कर्म्मणा ४१ ॥ ॥ ॥ ॥

दैवैर्दत्तवरं सुष्वाप सन्नफलं नासवानित्यर्थः ३९ न दैवात्प्रत्याहृतमपि तु भुजसंश्रयादेवेत्यर्थः ४० किं दैवबलाच्छापं उत्सृजंते कर्मणा न अपि तु कर्मणैवोत्सृजंते न तु दैवबलादित्यर्थः ४१

पापंपापिनंप्रतिसर्वैश्वर्यादिकंगुणातांतंलोकेप्राप्यउपेत्याविनंउत्सृजतेइतियोजना तथाचाभाराकः दैवेनदत्तंकर्मणानाशितमिति एतदेवसष्टयतिलोभेति ४२ देवस्यकर्मधी
नत्वमाहद्वाभ्यांयथेति ४४ कर्महीनः पाकरत्यादावप्रवृत्तः सन्निहितंपातालस्थंनिधिं नित्ययुक्तः यंजनादिसाधनोयुक्तः ४५ व्ययएवगुणः स्वभावोपसर्गेतिरिक्तं व्यप
गतमितिपाठेपिसएवार्थः निर्धनत्वान्नैरस्यक्तमपिसाधुंकर्मणासदाचारेणनिमित्तेनअहैकप्रियादेवाः संश्रयंतेस्वंस्वभागार्थमुपजीवंतीत्यर्थः ततश्चश्रेष्ठैः फलैरेतंयोजयंतीत्या
हभवतीतिविशिष्टत्वमेवाहवद्धिति समृध्याउपेतेगृहोणिगृहेवद्भत्व मार्थपितृवनभवनाभंश्मशानगृहतुल्यंअमराणांअमरैः ४६ विकर्माकर्महीनः नचफलंतस्मादिकंन

पापमुत्सृजतेलोकेसर्वंप्राप्यसुदुर्लभं लोभमोहसमापन्नंनदैवंत्रायतेनरं ४२ यथाग्निः पवनोद्धूतः सुसूक्ष्मोपिमहान्भवेत त
थाकर्मसमायुक्तंदैवंसाधुविवर्द्धते ४३ यथातैलक्षयाद्दीपः प्रह्रासमुपगच्छति तथाकर्मक्षयाद्दैवंप्रह्रासमुपगच्छति ४४ विपुल
मपिधनौघंप्राप्यभोगान्स्त्रियोवापुरुषइहनशक्तः कर्महीनोहिभोक्तुं सन्निहितमपिचार्थंदैवनैरक्ष्यमाणंपुरुषइहमहात्माप्राप्नुतेनित्य
युक्तः ४५ व्ययगुणमपिसाधुंकर्मणांसंश्रयंतेभवतिमनुजलोकाद्देवलोकोविशिष्टः बहुतरसमृद्ध्यामानुषाणांगृहाणिपितृवनभ
वनाभंदृश्यतेचामराणां ४६ नचफलतिविकर्माजीवलोकेनदैवंव्यपनयतिविमार्गंनास्तिदैवेप्रभुत्वं गुरुमिवकृतमग्र्यंकर्मसंयातिदैवं
नयतिवकृतमग्र्यंकर्मसंयापुरुषकारःसंचितस्तत्रतत्र ४७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्राप्नोति नापिकेवलं दैवंविमार्गगामिनंनरंव्यपनयतिविमार्गात्अन्यत्रनयति अतएवदैवेप्रभुत्वंनास्ति किंतुदैवंकृतंकर्मसंयातिपुरुषकारमनुसरातिगुरुशिष्यइवेत्यर्थः अतएव
पुरुषकारः यत्रयत्रविषयेसंविषयेसंचितः सम्यगनुष्ठितः तत्रतत्रदैवंनयति आविर्भावयति पुरुषकारेणसिद्धेर्थेलोकोदैवानुकूल्यादेतत्सिद्धमितिवदतीत्यर्थः गुरुमित्यत्रत्र
उपहतमदीनंकामकारेणदैवमितिपाठेकामकारेणइच्छयापयत्नपुरुषकार संचितस्तत्रैवदैवंचदीनंमनुपहतंचेतिनयतिज्ञापयतीत्यर्थः ४७ ॥श्रीरामायनम॥श्रीरामनामताके एम०

संहृश्य सम्यक्प्रयोगजः दृश्याऽनुमेयः ४८ ननु कृषिपर्जन्यन्यायेन दैवापेक्षा कर्मसिद्धिर्न कर्मापेक्षं दैवमिति प्रत्यक्षं तत्कथं विपरीतमुच्यत इत्याशंक्याह अभीति दैवस्य शाक्कर्मणाः अ
भ्युत्थानं व्यापारो द्विविधः संचितरूपेणावस्थानमेकः भोगार्थसमारंभरूपो द्वितीयः तत्र समारब्धेन उत्थानेन तदनुकूलेन कर्मणा चैहिकं फलमाप्नुयात् विधिना शास्त्रेण कर्मणा च
तदनुसारिणा स्वर्गमार्गमवाप्नुयात् दैवाधीनो भोगः कर्माधीनः संचय इति निष्कर्षः कृष्यादावपि दैवपतीक्षणं काष्ठपुरुषकर्म सेवनादिनापि फलस्योत्पादयितुं शक्यत्वादिति भावः
४९ अध्यायः ६ अहिषे गौतमीवारीनज्ञात्वातुः खं स्वदोषजं दत्वापि दारानतिथीन् सुदर्शनवार्चयन् १० ब्राह्मण्यं दुर्लभं ज्ञानन विश्वामित्रनिदर्शनात् आदर्शं स्य ९१

एतत्ते सर्वमाख्यातं मया वै मुनिसत्तम फलं पुरुषकारस्य सदा संदृश्य तत्त्वतः ४८ अभ्युत्थानेन दैवस्य समारब्धेन कर्म्मणा विधिना क
र्म्मणा चैव स्वर्गमार्गमवाप्नुयात् ४९ इति श्री अनुशासने पर्वणि दानधर्मे दैवपुरुषकारनिर्देशो नाम ६ युधिष्ठिर उवाच कर्म्म
णां च समस्तानां शुभानां भरतर्षभ फलानि महतां श्रेष्ठ प्रब्रूहि परिपृच्छतः १ भीष्म उवाच हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत रह
स्यं यदृषीणां तत् तच्छृणुष्व युधिष्ठिर या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता २ येन येन शरीरेण यद्यत्कर्म्म करोति यः तेन तेन श
रीरेण तत्तत्फलमुपाश्नुते ३ यस्यां यस्यामवस्थायां यत्करोति शुभाशुभं तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ४ ॥ ॥ ॥

धर्मे इति यः शुकवत् स्थितः २ दैवेन रक्षिते देह इति धर्मेति पन्नवान् धर्माधिकारोपदत्तः कोऽधर्मोऽयमुनिनोच्यते ३ धर्मात्मत्वं भवतीत्यत्र कोऽधर्मः किं फलं इति जिज्ञासुर्युधिष्ठिर उवाच क
र्मणामिति १ गतिः फलं येन कर्मणा प्रेत्यभावे मरणोत्तरं देहं तरणाशो २ येनेति मनसा कृतस्य कर्मणः फलं मनसैव स्वप्नादौ भुङ्क्ते कायेन कृतस्य फलं कायेनैव येनैव
भुङ्क्ते ज्ञायर्ज्ञावित्यर्थः ३ अवस्थायां बाल्ययौवनादिरूपायां आपद्यनापदि वा ४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

९१

नेति नाशो नैष्फल्यं अस्य कर्त्तुः साक्षिणां प्रमावे हि कृतं दृष्टैव स्यान्न तत्तत्त्वे इति भावः ५ दद्यादभ्यागताय इति शेषः ६ महत् अपरिमितं ७ वानप्रस्थधर्माणां फलान्याह स्थंडिलेष्वित्यादिना ८
योगात्मनि योगयुक्तचित्ते ९ एकशायी ब्रह्मचर्यवान् १२ वीर आसते स्मिन्निति वीरासनं रणदेशं मुपेत्य वीरशय्यां तत्र दीर्घनिद्रां च प्राप्य वीरस्थानं स्वर्गलोकं उपपागतो भवतिसेत्र

दृष्टं दद्या

न नश्यति कृतं कर्म्म सदा पंचेंद्रियैरिह ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च ५ चक्षुर्दद्यान्मनो दद्याद्वाचं सूनृतां अनुव्रजेदुपासीत स यज्ञः
पंचदक्षिणः ६ यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्त्तते श्रांतायादृष्टपूर्वाय तस्य पुण्यफलं महत् ७ स्थंडिलेषु शयानानां गृहाणि शयनानि
च चीरवल्कलसंवीते वासांस्याभरणानि च ८ वाहनानि च यानानि योगात्मनि तपोधने अग्नीनुपशयानस्य राज्ञः पौरुषमेव च ९ रसानां
प्रतिसंहारे सौभाग्यमनुगच्छति आमिषप्रतिसंहारे पशून्पुत्रांश्च विंदति १० अवाक्शिरास्तु यो लंबेदुदवासं च यो वसेत् सततं चैकशायीयः
स लभेतेप्सितां गतिं ११ पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयं दद्यादतिथिपूजार्थं स यज्ञः पंचदक्षिणः १२ वीरासनं वीरशय्यां वीरस्थान
मुपागतः अक्षयास्तस्य वै लोकाः सर्वकामगमास्तथा १३ धनं लभेत दानेन मौनेनाज्ञां विशाम्पते उपभोगांश्च तपसा ब्रह्मचर्येण जीवितं
१४ रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् १५ प्रायोपवेशिनां राजन्सर्वत्र सुखमुच्यते गवाढ्यः
शाकदीक्षायां स्वर्गगामी तृणाशनः १६ स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमं १७ ॥ ॥

यालोका इत्यर्थः १३ आज्ञाम् अविच्छिन्नामिति शेषः तपसा कृच्छ्रादिना जीवितं आयुः १५ शाकदीक्षायां शाकमात्राशननियमे १६ त्रिषः त्रिषवं स्नात्वेत्यर्थः ऋतं संकल्पं सत्यसंकल्पत्व
मिति यावत् दीक्षया पाप्मसेन १७ ॥ ॥ ॥ ॥ ॥

सदाग्निः अविच्छिन्नाग्निहोत्रः मुनुंगापत्रादिमंत्रं पार्यंतरेमिन्मसाधनंतपोविशेषः अनाशकेदितिमितमेध्याशनेः नशनेवा १८ द्वादशवार्षिकांदीक्षांयोउपवासव्रतार्थंक्षीरायां हारंव्रतंचयपोब्राह्मणासव्रतंयवागूराजन्यस्यामिक्षावैश्यस्येतिश्रुतिप्रदं अभिषेकंद्वादशवार्षिकंतीर्थेरनंवावीरस्थानात्स्वर्गादपिविशिष्यतेब्रह्मलोकप्रदमेतत्द्वयमित्यर्थः १७ ॥

सलिलासीभवेद्यस्तुसदाग्निः संस्कृतोद्विजः मनुसाधयतोराज्यंनाकपृष्ठमनाशके १९ उपवासंचदीक्षांचअभिषेकंचपार्थिव कृत्वाद्वादशवर्षाणिवीरस्थानाद्विशिष्यते १७ अधीत्यसर्ववेदान्वैसद्योदुःखाद्विमुच्यते मानसंहिचरन्धर्मंस्वर्गलोकमुच्यते २० याउस्त्यजादुर्म्मतिभिर्यानजीर्यतिजीर्यतः योसौप्राणांतिकोरोगस्तांतृष्णांत्यजतः सुखं २१ यथाधेनुसहस्रेषुवत्सोविंदतिमातरं एवंपूर्व्वकृतंकर्म्मकर्त्तारमनुगच्छति २२ अबोधयानानियथापुष्पाणिचफलानिच स्वंकालंनातिवर्त्तंतेतथाकर्म्मपुराकृतं २३ जीर्यंतिजीर्यतः केशादंताजीर्यंतिजीर्यतः चक्षुःश्रोत्रेचजीर्येतेतृष्णैकानतुजीर्यते २४ येनप्रीणातिपितरंतेनप्रीतः प्रजापतिः प्रीणातिमातरंयेनपृथिवीतेनपूजिता येनप्रीणात्युपाध्यायंतेनस्याद्ब्रह्मपूजितं २५ सर्वेतस्यादृताधर्म्मायस्यैतेत्रयआदृताः अनादृतास्तुयस्यैतेसर्वास्तस्याफलाः क्रियाः २६ वैशंपायनउवाच भीष्मस्यतद्वचः श्रुत्वाविस्मिताः कुरुपुंगवाः आसन्प्रहृष्टमनसः प्रीतिमंतोभवंस्तदा २७ यन्मंत्रेभवतिवृथोपयुज्यमानेयत्सोमेभवतिवृथाभिषूयमाणे यच्चाग्नौभवतिवृथाभिहूयमानेतत्सर्वंभवतिवृथाभिधीयमाने २८ इत्येतदृषिणाप्रोक्तमुक्तवानस्मिपद्विभो शुभाशुभफलप्राप्तौकिमतः श्रोतुमिच्छसि २९ इतिदानधर्म्मेकर्म्मफलिकोपाख्याने ७ ॥ ॥राम

कापिकंधर्ममुक्त्वावाचिकमाह अधीयसेति २० मानसंधर्मंविवृणोतियेति २७ मंत्रोच्चारणंत्रिगीयार्थंवृथा सोमाभिषवोदक्षिणांविनावृथा होमोमंत्रंविनावृथाएतैस्त्रिभिर्यस्यापंतसंवे

धा दि

केपूज्याइत्यादिनापूर्वोक्तधर्मानुविवृणोति तत्रापिचतुर्दश्यादिनाआतिथ्यंकर्तव्यमुक्तं तद्विवृणोत्यध्यायेन १ यदमुत्रेहचहितं तदृद्धे इतितद्ध्देतिशेषः २ ब्रह्मआनंदात्मास्वर्गः सत्संक
त्पत्वादिसिद्धिः तपः स्वाध्यायोसाधनंयस्यस्वर्गस्य ३ यतस्तमात्मानमनुविद्यविजानातिसर्वांश्चलोकानाप्नोतिसर्वांश्चकामानितिश्रुतेः स्वस्वधर्मतपः ४ अक्रूरंब्रह्मज्ञानहृदं ५

युधिष्ठिरउवाच केपूज्याः केनमस्कार्याः कान्नमस्यसिभारत एतन्मेसर्वमाचक्ष्वयेभ्यः स्पृहयसेनृप १ उत्तमापद्गतस्यापियत्रतेवर्ततेम
नः मनुष्यलोकेसर्वस्मिन्यदमुत्रेहचाप्युत २ भीष्मउवाच स्पृहयामिद्विजातिभ्योयेषांब्रह्मपरंधनं येषांस्वप्रत्ययःस्वर्गस्तपःस्वाध्यायसाध
नं ३ येषांबालाश्चवृद्धाश्चपित्र्यपैतामहींधुरं उद्वहंतिनसीदंतितेभ्योवैस्पृहयाम्यहं ४ विद्यास्वभिविनीतानांदांतानांमृदुभाषिणां श्रुतवृत्तोप
पन्नानांसदाक्षरविदांसतां ५ संसत्सुवदतांतातहंसानामिवसंघशः मंगल्यरूपारुचिरादिव्यजीमूतनिस्वनाः ६ सम्यगुच्चरितावा
चः श्रूयंतेहियुधिष्ठिर शुश्रूषमाणेनृपतौप्रेत्यचेहसुखावहाः ७ येचापितेषांश्रोतारः सदासदसिसंमताः विज्ञानगुणसंपन्नास्ते
भ्यश्चस्पृहयाम्यहं ८ सुसंस्कृतानिप्रयताः शुचीनिगुणवंतिच ददत्यन्नानितृप्त्यर्थंब्राह्मणेभ्योयुधिष्ठिर ९ येचापिसततंराजं
